॥ श्रीः ॥

श्रीमद्राजानक-कुन्तकविरचितं

# वक्रोक्तिजीवितम्

## 'सुधा'-संस्कृत-हिन्दीव्याख्याद्वयोपेतम्

## प्रथमोन्मेषः

अथ ग्रन्थादावाचार्यकुन्तकः शक्ति-परिस्पन्दमात्रोपकरणं शिवं वृत्या निर्विघ्न-ग्रन्थ-परिसमाप्त्यर्थं स्तौति—

**जगत्त्रितयवैचित्र्यचित्रकर्मविधायिनम् ।**
**शिवं शक्तिपरिस्पन्दमात्रोपकरणं नुमः ॥ १ ॥**

**अन्वयः**—जगत्त्रितयवैचित्र्यचित्रकर्मविधायिनं, शक्तिपरिस्पन्दमात्रोपकरणं शिवं नुमः ।

**सुधा—जगदिति** । जगत्त्रितयवैचित्र्यचित्रकर्मविधायिनम्—त्रयाणां जगतां समाहार इति जगत्त्रितयम्, विचित्रतायाः भावो वैचित्र्यम्, जगत्त्रितयमेव यद् वैचित्र्यं तदेव चित्रं कर्म यो विदधातीति तथाविधम् = त्रिभुवनाद्भुतरचनाचित्रकृत्यकर्माणम् । शक्तिपरिस्पन्दमात्रोपकरणम्—शक्तीनां चिदानन्देच्छाज्ञानक्रियाणां परिस्पन्दमात्रं = परिस्फुरणमात्रम् उपकरणं = साधनरूपम् । शिवम् = परमशिवतत्त्वम् । नुमः = स्तुमः ।

**हिन्दी**—प्रत्यभिज्ञादर्शनानुयायी आचार्य कुन्तक 'वक्रोक्तिजीवितम्' नामक ग्रन्थ को आरम्भ करते हुए उसके वृत्ति-भाग में निर्विघ्न ग्रन्थ परिसमाप्त्यर्थं परम शिवतत्त्व की वन्दना करते हैं :—

त्रिभुवन के वैचित्र्यरूप अद्भुत कर्म करने वाले शक्ति के परिस्फुरणमात्र के उपकरण वाले 'परम-शिवतत्त्व' रूपी तत्त्व को हम प्रणाम करते हैं ॥ १ ॥

**टिप्पणी**—आचार्य कुन्तक कश्मीरी होने के कारण कश्मीरी शैवागम (प्रत्यभिज्ञा-दर्शन) के अनुयायी थे । तदनुसार एक मात्र परम तत्त्व 'परम-शिव' हैं जो कि अपनी प्रमुख शक्तियों—चिद, आनन्द, इच्छा, ज्ञान तथा क्रिया पर निर्भर रहता है तथा इन्हीं ५ शक्तियों के द्वारा वह जगत्प्रपञ्च को स्फुरित करता है ।

**यथातत्त्वं विवेच्यन्ते भावास्त्रैलोक्यवर्तिनः ।**
**यदि तन्नाद्भुतं नाम दैवरक्ता हि किंशुकाः ॥ २ ॥**

Scanned with CamScanner

**अन्वयः**—यदि त्रैलोकवर्त्तिनः भावाः यथातत्त्वं विवेच्यन्ते तद् अद्भुतं नाम न हि किंशुकाः दैवरक्ताः ।

**सुधा—यथेति** । यदि = चेत् । त्रैलोकवर्त्तिनः = त्रिभुवनवर्तिनः । भावाः = पदार्थाः । यथातत्त्वम् = तत्त्वानुरूपम् । विवेच्यन्ते = वर्ण्यन्ते । तत् = तत्र । अद्भुतं नाम न = नैव किमप्याश्चर्यम् । हि = यतः । किंशुकाः = पलाशपुष्पाणि । दैवरक्ताः = प्रकृत्या रक्तवर्णानि भवन्ति ।

**हिन्दी**—यदि तीनों लोकों के पदार्थों का यथानुरूप विवेचन किया जाता है तो उसमें कोई अद्भुत नहीं है क्योंकि किंशुक ( टेसू का फूल ) प्रकृति से ही रक्त वर्ण होता है ॥ २ ॥

**स्वमनीषिकयैवाथ तत्त्वं तेषां यथारुचिः ।**
**स्थाप्यते प्रौढिमात्रं तत्परमार्थो न तादृशः ॥ ३ ॥**

**अन्वयः**—अथ यथारुचिः तेषां तत्त्वं स्वमनीषिकया एव स्थाप्यते, तत्प्रौढिमात्रम् । तादृशः परमार्थः न ।

**सुधा—स्वेति** । अथ = चेत् । यथारुचिः = स्वेच्छया । तेषाम् = त्रिलोकस्थित-पदार्थानाम् । तत्त्वम् = यथातथ्यरूपम् । स्वमनीषिकया = स्वबुद्धया । एव । स्थाप्यते = स्थापना क्रियते । तत् = तर्हि । प्रौढिमात्रम् = केवलं प्रौढिर्भवति । तादृशः = तथाविधः । परमार्थः = तत्त्वार्थः । न = नैव भवतीति ।

**हिन्दी**—यदि अपनी रुचि से त्रिभुवन में स्थित पदार्थों का वास्तविक रूप अपनी बुद्धि से ही निरूपित किया जाता है तो वह प्रौढिमात्र होगी । उस प्रकार का तत्त्व नहीं है । जैसे यदि कोई घोड़े के ४ सींग और ८ पैर होने का वर्णन करे जो कि यथार्थ-शून्य है तो यह भी काव्य नहीं होगा ॥ ३ ॥

**इत्यसत्तर्कसन्दर्भे स्वतन्त्रेऽप्यकृतादरः ।**
**साहित्यार्थसुधासिन्धोः सारमुन्मीलयाम्यहम् ॥ ४ ॥**
**येन द्वितयमप्येतत्तत्त्वनिर्मितिलक्षणम् ।**
**तद्विदामद्भुतामोदचमत्कारं विधास्यति ॥ ५ ॥**

**अन्वयः**—इति असत्तर्कसन्दर्भे स्वतन्त्रे अपि अकृतादरः अहं साहित्यसुधा-सिन्धोः सारम् उन्मीलयामि । येन एतत् तत्त्वनिर्मितिलक्षणं द्वितयम् अपि तद्विदाम् अद्भुतामोदचमत्कारं विधास्यति ।

**सुधा—इतीति** । इति = इत्थम् । असत्तर्कसन्दर्भे = मिथ्यावादप्रसङ्गे । स्वतन्त्रे = स्वच्छन्दे । अपि अकृतादरः—न कृतः = अकृतः आदरो येन सः = अविहितसत्कारः अहम् = राजानककुन्तकः । साहित्यार्थसुधासिन्धोः—साहित्यार्थ एव सुधायाः सिन्धु-स्तस्य = साहित्यार्थामृतसागरस्य । सारम् = तत्त्वम् । उन्मीलयामि = उद्घाटयामि । येन = यदुन्मीलनेन । एतत् = इदम् । तत्त्वनिर्मितिलक्षणम् = तत्त्वनिष्पन्नरूपम् । द्वितयम् = उभयम् अपि । तद्विदाम् = तत्त्वार्थज्ञानिनाम् । अद्भुतामोदचमत्कारम् = विचित्र-प्रसन्नता-चमत्कृतिम् । विधास्यति = करिष्यति ।



**हिन्दी**—इस प्रकार मिथ्या तर्क के प्रसंग वाले स्वतन्त्र में श्रद्धा न रखने वाला मैं साहित्यार्थ रूपी अमृतसागर के तत्त्व का उन्मीलन करने जा रहा हूँ जिससे यह तत्त्व और निर्मितिलक्षण दोनों ही काव्य तत्त्वार्थ को जानने वाले विद्वानों के हृदय में अद्भुत प्रसन्नता तथा चमत्कार उत्पन्न कर देंगे ॥ ४-५ ॥

**ग्रन्थारम्भेऽभिमतदेवतानमस्कारकरणं समाचारः, तस्मात्तदेव तावदुपक्रमते—**

**सुधा—ग्रन्थेति** । ग्रन्थारम्भे = ग्रन्थादौ । अभिमतदेवतानमस्कारकरणम् = अभीष्ट देव-प्रणामकरणम् । समाचारः—सम् = समीचीनः आचारः = आचरणं भवति । तस्मात् = तर्हि । तदेव = मङ्गलाचरणमेव । तावत् = ग्रन्थादौ । उपक्रियते = विधीयते ।

**हिन्दी**—ग्रन्थ के आरम्भ में अभीष्ट देवता को प्रणाम करना उत्तम आचरण होता है अतः वह मङ्गलाचरण ही ग्रन्थारम्भ में किया जा रहा है ।

**वन्दे कवीन्द्रवक्त्रेन्दुलास्यमन्दिरनर्तकीम् ।**
**देवीं सूक्तिपरिस्पन्दसुन्दराभिनयोज्ज्वलाम् ॥ १ ॥**

**अन्वयः**—कवीन्द्रवक्त्रेन्दुलास्यमन्दिरनर्त्तकीं सूक्तिपरिस्पन्दसुन्दराभिनयोज्ज्वलां देवीं वन्दे ।

**सुधा—वन्द इति** । कवीन्द्रवक्त्रेन्दुलास्यमन्दिरनर्त्तकीम्—कवीन्द्रस्य वक्त्रम् एव इन्दुरिति, स एव मन्दिरं तत्र नर्तकी, ताम् = कविकरमुखचन्द्रमन्दिरलासिकाम् । सूक्तिपरिस्पन्दसुन्दराभिनयोज्ज्वलाम्—सूक्तिपरिस्पन्दाः = सुभाषितविलासितानि, तान्येव सुन्दराभिनयाः = सुकुमाराः सात्त्विकादयः, तै उज्ज्वलाम् = भ्राजमानाम्, या किल सत्कविवक्त्रे लास्यवेश्मनीव नर्त्तकी सविलासाऽभिनयविशिष्टा नृत्यन्ती विराजते ताम् । देवीम् । वन्दे = नौमीति वाक्यार्थः । तदिदमत्र तात्पर्यम्—यत्किल प्रस्तुतं वस्तु किमपि काव्यालङ्कारकरणं तदधि दैवतभूतामेवं विषरामणीयकहृदयहारिणीं वाग्रूपां सरस्वतीं स्तौमीति ॥ १ ॥

**हिन्दी**—( मैं राजानक कुन्तक कवि ) कविवरों के मुखचन्द्र रूपी नृत्यनिकेतन में नर्तन करने वाली, सूक्तियों के विलासरूपी सुन्दराभिनयों—सात्विकादि से उज्ज्वल ( सुशोभित ) सरस्वती देवी को प्रणाम करता हूँ । तात्पर्य यह है कि जो कुछ यहाँ प्रस्तुत विषय है वह काव्यालङ्कार की स्थापना है तथा उसकी अधिष्ठात्री रमणीयता के कारण हृदयहारिणी भगवती सरस्वती को मैं प्रणाम करता हूँ ॥ १ ॥

**देवीं वन्दे, देवतां स्तौमि । कामित्याह—कवीन्द्रवक्त्रेन्दुलास्यमन्दिरनर्तकीम् । कवीन्द्राः कविप्रवरास्तेषां वक्त्रेन्दुर्मुखचन्द्रः स एव लास्यमन्दिरं नाट्यवेश्म, तत्र नर्तकीं लासिकाम् । किंविशिष्टाम्; सूक्तिपरिस्पन्दसुन्दराभिनयोज्ज्वलाम् ।**

Scanned with CamScanner

**सूक्तिपरिस्पन्दाः सुभाषितविलसितानि तान्येव सुन्दरा अभिनयाः सुकुमाराः सात्त्विकादयस्तैरुज्ज्वलां भ्राजमानाम्। या किल सत्कविवक्त्रे लास्यवेश्मनीव नर्तकी सविलासाभिनयविशिष्टा नृत्यन्तो विराजते तां वन्दे नौमीति वाक्यार्थः। तदिदमत्र तात्पर्यम्—यत्किल प्रस्तुतं वस्तु किमपि काव्यालङ्कारकरणं तदधिदैवतभूतामेवंविधरामणीयकहृदयहारिणीं वाग्रूपां सरस्वतीं स्तौमीति।**

**सुधा**—देवीमिति। देवीं वन्दे = देवतां स्तौमि। कामित्याह—कवीन्द्रवक्त्रेन्दु लास्य मन्दिरनर्तकीम्। कवीन्द्राः = कविप्रवरास्तेषां वक्त्रेन्दुर्मुखचन्द्रः स एव लास्यमन्दिरम् = नाट्यवेश्य, तत्र नर्तकीम् = लासिकाम्। किं विशिष्टाम्—सूक्तिपरिस्पन्दसुन्दराभिनयोज्ज्वलाम्। सूक्तिपरिस्पन्दाः = सुभाषितविलसितानि तान्येव सुन्दराः अभिनयाः सुकुमाराः सात्त्विकादयस्तैरुज्ज्वलां = भ्राजमानाम्। या किल सत्कविवक्त्रे लास्यवेश्मनीव नर्तकीसविलासाभिनयविशिष्टा नृत्यन्ती विराजते। तां वन्दे नौमीति वाक्यार्थः। तदिदमत्र तात्पर्यम्—यत्किल प्रस्तुतं वस्तु किमपि काव्यालङ्कारकरणं तदधिदैवतभूतामेवं विधरामणीयकहृदयहारिणीं वाग्रूपां सरस्वतीं स्तौमीति।

**हिन्दी**—देवी की वन्दना करता हूँ—देवता की स्तुति करता हूँ। किसकी? कविवरों के मुखचन्द्र भगवान् शिव के लास्य-मन्दिर-नर्तकी की! कवीन्द्र या कविप्रवर, उनका मुखचन्द्र, वह ही लास्यमन्दिर या नाट्यगृह, जिसमें नर्तन करने वाली की किस विशिष्टता वाली की? सूक्ति-परिस्पन्द सुन्दर अभिनय से उज्ज्वल की। सूक्तिपरिस्पन्द या सुभाषित-विलसित, वे ही सुन्दर अभिनय सुकुमार सात्त्विक आदि उनसे उज्ज्वल या शोभित, जो कि सत्कवि मुख में लास्य गृह में नर्तकी सदृश सविलास अभिनव विशेष वाली नृत्य करती हुई सुशोभित होती है, उसको प्रणाम करता हूँ यह वाक्यार्थ है। अतः यह यहाँ तात्पर्य है—प्रस्तुत वस्तु किसी काव्यालङ्कार की रचना, उसके अधिदैवत भूत इस प्रकार रामणीयक हृदय-हारिणी वाणी रूपी सरस्वती को प्रणाम करता हूँ।

**एवं नमस्कृत्येदानीं वक्तव्यवस्तुविषयभूतान्यभिधानाभिधेयप्रयोजनान्यासूत्रयति—**

**सुधा**—एवमिति। एवम् = इत्थम्। सरस्वतीं देवीं नमस्कृत्य = प्रणम्य। इदानीम् = साम्प्रतम्। वक्तव्यवस्तुविषयभूतानि = वर्ण्यवस्तुसम्बन्धीनि। अभिधेयाभिधेयप्रयोजनानि = संज्ञासंज्ञेयप्रयोजनानि। आसूत्रयति = आरभते।

**हिन्दी**—इस प्रकार अभीष्ट वाग्देवी को प्रणाम कर अब वर्णनीय विषयवस्तु से सम्बन्धित संज्ञा और संज्ञेय विषय तथा प्रयोजन को आरम्भ किया जा रहा है।

**वाचो विषयनैयत्यमुत्पादयितुमुच्यते।**
**आदिवाक्येऽभिधानादिनिर्मितेर्मानसूत्रवत् ॥ ६ ॥**

**इत्यन्तरश्लोकः।**

**अन्वयः**—वाचः विषयनैयत्यम् उत्पादयितुम् आदिवाक्ये मानसूत्रवत् अभिधानादिनिर्मितेः उच्यते।



**सुधा**—वाचः = वाणेः। विषयनैयत्यम् = वस्तुनियन्त्रणम्। उत्पादयितुम् = जनयितुम्। आदिवाक्ये = प्रारम्भिकवाक्य एव। अभिधानादिनिर्मितेः = अनुबन्धचतुष्टयनिर्माणस्य। मानसूत्रवत् = भवननिर्माणादौ मापसूत्रवत्। उच्यते = कथ्यते।

**हिन्दी**—वाणी को वर्ण्यविषय की सीमा में नियन्त्रित करने के लिए प्रारम्भिक वाक्य में अभिधान (अनुबन्धचतुष्टय) के निर्माण को उसी प्रकार कह रहे हैं जैसे भवननिर्माण में नापने आदि के लिए फीता। अर्थात् वाग्देवी के विशाल वैभव को संक्षेप में प्रस्तुत कर रहा हूँ ॥ ६ ॥

यह अन्तरश्लोक है।

**लोकोत्तरचमत्कारकारिवैचित्र्यसिद्धये।**
**काव्यस्यायमलङ्कारः कोऽप्यपूर्वो विधीयते ॥ २ ॥**

**अन्वयः**—लोकोत्तरचमत्कारकारिवैचित्र्यसिद्धये कोऽपि अयं काव्यस्य अलङ्कारः विधीयते।

**सुधा**—लोकोत्तरेति। लोकोत्तरचमत्कारकारिवैचित्र्यसिद्धये = अलौकिकचमत्कारजनकवैचित्र्यसिद्धिकरणाय। कः अपि = कश्चिदपि। अयम् = एषः। काव्यस्य, अलङ्कारः = अलङ्कृतिः। विधीयते = क्रियते।

**हिन्दी**—अलौकिक चमत्कारजनक विचित्रता की सिद्धि के लिए कोई यह काव्य का अलङ्कार ग्रन्थ बनाया जा रहा है ॥ २ ॥

**अलङ्कारो विधीयते अलङ्करणं क्रियते। कस्य—काव्यस्य। कवेः कर्म काव्यं तस्य। ननु च सन्ति चिरन्तनास्तदलङ्कारास्तत्किमर्थमित्याह—अपूर्वः, तद्व्यतिरिक्तार्थाभिधायी। तदपूर्वत्वं तदुत्कृष्टस्य तन्निकृष्टस्य च द्वयोरपि सम्भवतीत्याह—कोऽपि, अलौकिकः सातिशयः। सोऽपि किमर्थमित्याह—लोकोत्तरचमत्कारकारिवैचित्र्यसिद्धये असामान्याह्लादविधायिविचित्रभावसम्पत्तये। यद्यपि सन्ति शतशः काव्यालङ्कारास्तथापि न कुतश्चिदप्येवंविधवैचित्र्यसिद्धिः।**

**सुधा**—अलङ्कार इति। अलङ्कारो विधीयते = अलङ्करणं क्रियते। कस्य—काव्यस्य। कवेः कर्म काव्यं तस्य। ननु च सन्ति चिरन्तनाः = प्राचीनास्तदलंकारास्तत्किमर्थमित्याह—अपूर्वः = अद्भुतः। तद्व्यतिरिक्तार्थाभिधायी। तदपूर्वत्वं तदुत्कृष्टस्य तन्निकृष्टस्य च द्वयोरपि सम्भवतीत्याह कोऽपि, अलौकिकः = सातिशयः। सोऽपि किमर्थमित्याह—लोकोत्तरचमत्कारकारिवैचित्र्यसिद्धये = असामान्याह्लादविधायिविचित्रसम्पत्तये। यद्यपि सन्ति शतशः काव्यालङ्कारास्तथापि—कुतश्चिदप्येवं विधवैचित्र्यसिद्धिः।

**हिन्दी**—अलङ्करण किया जा रहा है। किसका? काव्य का। कवि का कर्म काव्य होता है, उसका। यद्यपि बहुत से अलङ्कारग्रन्थ प्राचीन है ही, फिर भी इसका निर्माण किसलिए? इसका उत्तर है—यह अलङ्कारग्रन्थ अपूर्व है अर्थात् उनसे भिन्न अर्थ का अभिधान करने वाला है। इसकी अपूर्वता इसके उत्कृष्ट और निकृष्ट दोनों प्रकार से होती है। उसको कहते हैं कि कोई अलौकिक, वह भी किसलिए? लोकोत्तर चमत्कार उत्पन्न

करने वाली विचित्रता की सिद्धि के लिए। यह असामान्य आह्लाददायी विचित्रभाव-सम्पादन के लिए। यद्यपि सैकड़ों काव्यालङ्कार ग्रन्थ हैं तथापि कहीं से इस प्रकार की वैचित्र्य सिद्धि की जा रही है।

**अलङ्कारशब्दः शरीरस्य शोभातिशयकारित्वान्मुख्यतया कटकादिषु वर्तते, तत्कारित्वसामान्यादुपचारादुपमादिषु, तद्वदेव च तत्सदृशेषु गुणादिष, तथैव च तदभिधायिनि ग्रन्थे शब्दार्थयोरेकयोगक्षेमत्वादैक्येन व्यवहारः, यथा गौरिति शब्दः गौरित्यर्थं इति। तदयमर्थः—ग्रन्थस्यास्यालङ्कार इत्यभिधानम्, उपमादि-प्रमेयजातमभिधेयम्, उक्तरूपवैचित्र्यसिद्धिः प्रयोजनमिति।**

सुधा—अलङ्कार इति। अलङ्कारशब्दः शरीरस्य = देहस्य शोभातिशयकारित्वात्—अतिशयेन शोभा यत्र स शोभातिशायी, तस्य भावस्तस्मात् = अत्यन्तशोभाकारकत्वात्। मुख्यतया = प्रधानतया। कटकादिषु = कटकाद्याभूषणेषु। वर्तते = अस्ति। तत्कारित्व-सामान्यात् = शोभातिशयत्वसाधारण्यात्। उपमादिषु = उपमारूपकादिषु। उपचारात् = साधर्म्यात्। तद्वदेव = उपमादिवदेव। च। तत्सदृशेषु = तत्समेषु गुणादिषु। तथैव च। तदभिधायिनि ग्रन्थे = अलङ्कारनाम्नि ग्रन्थे। शब्दार्थयोः = वाचकवाच्ययोः। एकयोग-क्षेमत्वात् = समानयोगक्षेमकारणात्। ऐक्येन = समानतया। व्यवहारः = प्रयोगः। यथा = येन प्रकोरण। गौः इति शब्दः। गौरेव। अर्थः = तात्पर्यं भवतीति। तत् = तथा। अयम् = एषः अर्थः। ग्रन्थस्यास्य अलङ्कार इति = एवम्। अभिधानम् = नाम। उपमादि-प्रमेयजातमभिधेयम् = प्रतिपाद्यम्। उक्तरूपवैचित्र्यसिद्धिः = लोकोत्तरचमत्कारकारि-वैचित्र्यसिद्धिः प्रयोजनमस्तीति।

हिन्दी—शरीर की अतिशय शोभा करने के कारण प्रधान रूप से कटक आदि आभूषणों में अलङ्कार शब्द का प्रयोग किया जाता है उसी प्रकार समान रूप से काव्य में शोभातिशय के कारण उपमादि में भी अलंकार शब्द का प्रयोग होता है तथा उसी प्रकार उसका तत्सदृश गुणादि होने पर अलङ्कारों का प्रतिपादन करने वाले ग्रन्थ के सम्बन्ध में भी अलङ्कार शब्द का प्रयोग होता है। शब्द तथा अर्थ दोनों का समान रूप से योगक्षेम करने के कारण दोनों के स्थान पर एक शब्द का प्रयोग होता है जिस प्रकार गौ शब्द है तथा गाय उसका अर्थ है उसी प्रकार इस ग्रन्थ का नाम अलङ्कार ग्रन्थ है। उपमादि प्रमेयजात अभिधेय अर्थात् प्रतिपाद्य विषय हैं तथा पूर्वोक्त वैचित्र्यसिद्धि इसका प्रयोजन है।

**एवमलङ्कारस्यास्य प्रयोजनमस्तीति स्थापितेऽपि तदलङ्कार्यस्य काव्यस्य प्रयोजनं विना यदपि सदपार्थकमित्याह—**

सुधा—एवमिति। एवम् = इत्थम्। अस्य = एतस्य। अलङ्कारस्य = अलङ्कारग्रन्थस्य। प्रयोजनम् = उद्देश्यम्। स्थापिते = प्रमाणिते अपि। तदलङ्कार्यस्य = अलंकारशोभितस्य। काव्यस्य प्रयोजनं विना = प्रयोजनशून्येन। यद्यपि सदपार्थकम् = प्रयोजनमूलमपि व्यर्थम् इत्याह।



हिन्दी—इस प्रकार इस अलंकार के प्रयोजन को सिद्ध कर लेने पर भी अलंकार के द्वारा सुशोभित काव्य के प्रयोजन के विना यह प्रयोजनमूल भी व्यर्थ ही है। ग्रन्थकार का कथन है—

**धर्मादिसाधनोपायः सुकुमारक्रमोदितः।**
**काव्यबन्धोऽभिजातानां हृदयाह्लादकारकः॥ ३॥**

अन्वयः—सुकुमारक्रमोदितः काव्यबन्धः, धर्मादिसाधनोपायः अभिजातानां हृदया-ह्लादकारकः।

सुधा—धर्मेति। सुकुमारक्रमोदितः = सुकुमारपरिपाट्या कथितः। काव्यबन्धः = सर्गबन्धादिः। धर्मादिसाधनोपायः = धर्मार्थकाममोक्षसाधनोपायः। अभिजातानाम् = राजपुत्रादीनाम्। हृदयाह्लादकारकः = चित्तानन्दकारकः भवतीति।

हिन्दी—कोमल परिपाटी से कहा गया महाकाव्य धर्म अर्थ काम मोक्ष के साधन का उपाय है तथा अभिजात ( कुलीन ) राजपुत्रों आदि के हृदय को आह्लादित करने वाला होता है॥ ३॥

**हृदयाह्लादकारकश्चित्तानन्दजनकः काव्यबन्धः सर्गबन्धादिर्भवतीति सम्बन्धः। कस्येत्याकाङ्क्षायामाह—अभिजातानाम्। अभिजाताः खलु राज-पुत्रादयो धर्माद्युपेयार्थिनो विजिगीषवः क्लेशभीरवश्च, सुकुमाराशयत्वात्तेषाम् तथा सत्यपि तदाह्लादकत्वे काव्यबन्धस्य क्रीडनकादिप्रख्यता प्राप्नोतीत्याह—धर्मादिसाधनोपायः। धर्मादिरुपेयभूतस्य चतुर्वर्गस्य साधने सम्पादने तदुपदेश-रूपत्वादुपायस्तत्प्राप्तिनिमित्तम्।**

सुधा—हृदयेति। हृदयाह्लादकारकः = चित्तानन्दजनकः। काव्यबन्धः = सर्गबन्धादिः भवतीतिसम्बन्धः, कस्येत्याकांक्षायामाह—अभिजातानाम्। अभिजाताः खलु राजपुत्रादयो धर्माद्युपेयार्थिनो विजिगीषवः क्लेशभीरवश्च सुकुमाराशयत्वात्। तेषां = राजपुत्राणाम्। तथा सत्यपि तदाह्लादकत्वेकाव्यबन्धस्य क्रीडनकादिप्रख्यता प्राप्नोतीत्याह—धर्मादि-साधनोपायः। धर्मादिरुपेयभूतस्य चतुर्वर्गस्य साधने = सम्पादने तदुपदेशरूपत्वात् उपाय-स्तत्प्राप्तिनिमित्तम्।

हिन्दी—हृदय में आह्लाद उत्पन्न करने वाला काव्यबन्ध होता है। किसका? इस आकांक्षा में कहा—अभिजातों का। अभिजात या कुलीन वास्तव में राजपुत्र आदि धर्म-अर्थ-काम-मोक्ष उपायों से प्राप्त करने के प्रार्थी, विजय की इच्छा करने वाले तथा कष्टों से भयभीत सुकुमार स्वभाव वाले होते हैं। उन राजकुमारों के चित्त को प्रसन्न करने वाला होने पर भी काव्यबन्ध खिलौनों आदि के समान प्रसिद्धता प्राप्त कराता है। इसका उनके लिए और कोई प्रयोजन नहीं होता है? इसके उत्तर में कहा गया है—धर्मादिचतुर्वर्ग के साधन में उसकी प्राप्ति का निमित्त काव्यबन्ध होता है।

**तथापि तथाविधपुरुषार्थोपदेशपरैरपरैरपि शास्त्रैः किमपराद्धमित्यभिधीयते—**

Scanned with CamScanner

**सुकुमारक्रमोदितः। सुकुमारः सुन्दरः सहृदयहृदयहारी क्रमः परिपाटीविन्यासस्तेनोदितः कथितः सन्। अभिजातानामाह्लादकत्वे सति प्रवर्तकत्वात्काव्यबन्धो धर्मादिप्राप्त्युपायतां प्रतिपद्यते। शास्त्रेषु पुनः कठोरक्रमाभिहितत्वाद् धर्माद्युपदेशो दुरवगाहः। तथाविधे विषये विद्यमानोऽप्यकिञ्चित्कर एव।**

**सुधा**—तथापीति। तथापि = एवत्कृतेऽपि। तथाविधपुरुषार्थोपदेशपरैः=तथाविधस्य तत्प्रकारस्य पुरुषार्थस्य उपदेशपराः = शिक्षायुक्तास्तैः। अपरैः = अन्यैः अपि। शास्त्रैः = ज्ञानग्रन्थैः। किमपराद्धम् = कोऽपराधः कृतः। इति = एवम्। अभिधीयते = कथ्यते। सुकुमारक्रमोदितः = सरलपरिपाट्या वर्णितः। सुकुमारः शब्दः सहृदयहृदयहारी—सहृदयानाम् = सरसाम्, हृदयान् = चेतांसि हरतीति तथाविधः। क्रमः = परिपाटी। विन्यासः, परिपाट्या = क्रमानुसारेण विन्यासः = रचनाशैली। तेन = तथाविधविन्यासेन उदितः = कथितः सन्। अभिजातानाम् = राजपुत्राणाम् आह्लादकत्वे = मनोरञ्जकत्वे सति। प्रवर्तकत्वात् = प्रवर्तकत्वहेतोः। काव्यबन्धः = काव्यरचना। धर्मादिप्राप्त्युपायत्वात् = धर्मार्थकाममोक्षपुरुषार्थानाम् प्राप्तिरुपलब्धिः, तस्यभावस्ताम्। प्रतिपद्यते = सम्पद्यते। पुनः = भूयः। शास्त्रेषु = ग्रन्थेषु। कठोरक्रमाभिहितत्वात् = क्लिष्टारम्भत्वात्। धर्माद्युपदेशः = धर्मादिशिक्षा। दुरवगाहः = क्लिष्टः। तथाविधे विषये = तत्प्रकारके विषये। विद्यमानः = स्थितः अपि। अकिञ्चित्कर एव = व्यर्थं एवास्ति।

**हिन्दी**—तथापि उपाय द्वारा प्राप्य पुरुषार्थ युक्त अन्य शास्त्रों के द्वारा क्या अपराध किया गया है जो कि काव्यबन्ध को ही धर्मादि साधनों का उपाय कहा गया है? अतः अब कहा जाता है—काव्यबन्ध सुकुमार क्रम से कहा गया होता है। सुकुमार अर्थात् सुन्दर सज्जनों के हृदय को हरने वाला, क्रम परिपाटी से रचित होने के कारण धर्मादि का साधन कहा गया है। राजपुत्रों के लिए मनोरञ्जक होने पर प्रवर्त्तक होने के कारण काव्यबन्ध धर्मादि प्राप्ति का उपाय बन जाता है। फिर शास्त्रों में कठोर क्रम होने के कारण धर्मादि का उपदेश कठिनता से समझा जा सकता है। अतः धर्मादि के विषय में शास्त्रादि विद्यमान होता हुआ भी व्यर्थ है।

**राजपुत्राः खलु समासादितविभवाः समस्तजगतीव्यवस्थाकारितां प्रतिपद्यमानाः श्लाघ्योपायोपदेशशून्यतया स्वतन्त्राः सन्तः समुचितसकलव्यवहारोच्छेदं प्रवर्तयितुं प्रभवन्तीत्येतदर्थमेतद्व्युत्पत्तये व्यतीतसच्चरितराजचरितं तन्निदर्शनाय निबध्नन्ति कवयः। तदेवं शास्त्रातिरिक्तं प्रगुणमस्त्येव प्रयोजनं काव्यबन्धस्य।**

**सुधा**—राजपुत्रा इति। राजपुत्राः = राजकुमाराः। खलु = किल। समासादितविभवाः—समासादितः = समधिगतः विभवः = ऐश्वर्यम् यैस्ते। समस्तजगतीव्यवस्थाकारिताम् = सकलभूमिप्रबन्धकारिताम्। प्रतिपद्यमानाः = क्रियमाणाः। श्लाघ्योपायोपदेशशून्यतया—श्लाघ्यैः = प्रशंसनीयैः, उपायोपदेशैः = उपायशिक्षाभिः, शून्यतया = रिक्ततया। स्वतन्त्राः = स्वच्छन्दाः सन्तः। समुचितसकलव्यवहारोच्छेदम् = उपयुक्तनिखिलव्यवहारविनाशम्। प्रवर्तयितुम् = चालयितुम्। प्रभवन्ति, इति = एवम्। एतदर्थम् = एतन्निमित्तम्। एतद्व्युत्तये = व्याख्यायै। कवयः = सूरयः। व्यतीतसच्चरितराजचरितम् = अतीतोत्तमाचरणनृपचरित्रम्। तन्निदर्शनाय = तेषामुपदेशाय। निबध्नन्ति = काव्यबन्धरूपेण वर्जयन्ति। तत् = तस्मात्। एवम् = इत्थम्। शास्त्रातिरिक्तम् = शास्त्रभिन्नम्। प्रगुणम् = प्रकृष्टगुणयुक्तम्। काव्यबन्धस्य = प्रबन्धस्य। प्रयोजनम् = कारणम्। अस्त्येव = नूनमेवास्ति।



**हिन्दी**—वास्तव में ऐश्वर्य युक्त तथा समस्त पृथ्वी की व्यवस्था करते हुए राजपुत्र प्रशंसनीय उपाय-शिक्षा से शून्य होने के कारण स्वतन्त्र होते हुए सम्पूर्ण व्यवहारों का विनाश करने के लिए समर्थ होते हैं। अतः इस निमित्त यह व्याख्या करने के लिए कवि अतीत के उत्तम चरित्र वाले राजाओं के चरित्र का उनके निर्देशन करने के लिए काव्यबन्ध के रूप में वर्णन करते हैं। अतः इस प्रकार शास्त्रातिरिक्त प्रकृष्ट गुणों से युक्त काव्यबन्ध का प्रयोजन तो निश्चय रूप से है ही।

**मुख्यं पुरुषार्थसिद्धिलक्षणं प्रयोजनमास्तां तावत्, अन्यदपि लोकयात्राप्रवर्तननिमित्तं भृत्यसुहृत्स्वाम्यादिसमावर्जनमनेन विना सम्यङ् न सम्भवतीत्याह—**

**सुधा**—मुख्यमिति। मुख्यम् = प्रमुखम्। पुरुषार्थसिद्धिलक्षणम् = धर्मादि-प्राप्तिरूपम्। प्रयोजनम् = कारणम्। तावत् आस्ताम् = स्यात्। अन्यत् अपि = अपरमपि। लोकयात्राप्रवर्तननिमित्तम् = लोकव्यवहारकारणभूतम्। भृत्यसुहृत्स्वाम्यादिसमावर्जनम् = सेवकमित्रस्वामिप्रभृत्याकर्षणम्। अनेन विना = एतेन बाह्यज्ञानेन विना सम्यक् = समीचीनम्। न सम्भवति = नैव जायते। इति = एवम्। आह = प्राह।

**हिन्दी**—प्रमुख पुरुषार्थचतुष्टयसिद्धि रूप प्रयोजन को रहने दें। अन्य भी लोकव्यवहार की प्रवृत्ति के कारणभूत सेवक, मित्र तथा स्वामी आदि का सम्यक् आकर्षण इसके बाह्य ज्ञान के विना ठीक प्रकार सम्भव नहीं है। अतः कहा है:—

**व्यवहारपरिस्पन्दसौन्दर्यं व्यवहारिभिः।**
**सत्काव्याधिगमादेव नूतनौचित्यमाप्यते॥ ४॥**

**अन्वयः**—व्यवहारपरिस्पन्दसौन्दर्यं, नूतनौचित्यं व्यवहारिभिः सत्काव्याधिगमात् एव आप्यते।

**सुधा**—व्यवहारेति। व्यवहारपरिस्पन्दसौन्दर्यम्—व्यवहारः = लोकवृत्तम्, तस्य परिस्पन्दः = व्यापारः, तस्य यत् सौन्दर्यम् = रामणीयकम्, तत् नूतनौचित्यम् = अभिनवौचित्यम्। व्यवहारिभिः = व्यवहर्तृभिः। सत्काव्याधिगमात् = कमनीयकाव्यपरिज्ञानात् एव। नान्यस्मात्। आप्यते = प्राप्यते।

**हिन्दी**—लोकव्यवहार में सदा प्रवृत्त रहने वाले लोग नूतन औचित्य से युक्त लोकाचार के व्यापार के सौन्दर्य को उत्तम काव्य के परिज्ञान द्वारा ही प्राप्त करते हैं॥ ४॥

**व्यवहारो लोकवृत्तं तस्य परिस्पन्दो व्यापारः क्रियाक्रमलक्षणस्तस्य सौन्दर्यं रामणीयकं तद्व्यवहारिभिर्व्यवहर्तृभिः सत्काव्याधिगमादेव कमनीयकाव्यपरिज्ञानादेव नान्यस्माद् आप्यते लभ्यत इत्यर्थः। कीदृशं तत्सौन्दर्यम्—नूतनौचित्यम्। नूतनमभिनवमलौकिकमौचित्यमुचितभावो यस्य। तदिदमुक्तं भवति—महतां हि राजादीनां व्यवहारे वर्ण्यमाने तदङ्गभूता सर्वे मुख्यामात्यप्रभृतयः समुचितप्रातिस्विककर्तव्यव्यवहारनिपुणतया निबध्यमानाः सकलव्यवहारिवृत्तोपदेशतामापद्यन्ते। ततः सर्वः क्वचित्कमनीयकाव्ये कृतश्रमः समासादितव्यवहारपरिस्पन्दसौन्दर्यातिशयः श्लाघनीयफलभाग् भवतीति।**

**सुधा**— **व्यवहार इति।** व्यवहारः = लोकवृत्तम्, तस्य परिस्पन्दः = व्यापारः क्रियाक्रमलक्षणः, तस्य सौन्दर्यं = रामणीयकम्। तद्व्यवहारिभिः = व्यवहर्तृभिः। सत्काव्याधिगमात् उत्तमकाव्योपलब्धेः एव कमनीयकाव्यपरिज्ञानादेव वा, नान्यस्मात्। आप्यते = लभ्यत इत्यर्थः। कीदृशं तत्सौन्दर्यम्—नूतनौचित्यम्, नूतनम् = अभिनवम् अलौकिकम् औचित्यम् = उचितभावो यस्य तत् औचित्यम्। तदिदमुक्तं भवति = अत एवेदं कथ्यते। महतां हि = राजादीनाम्। व्यवहारे = वर्ण्यमाने तदङ्गभूताः सर्वे मुख्यामात्यप्रभृतयः। समुचितप्रातिस्विक-कर्त्तव्यव्यवहारनिपुणतया निबध्यमानाः = रचिताः। सकलव्यवहारि वृत्तोपदेशताम् आपद्यन्ते। ततः सर्वः क्वचित् कमनीयकाव्ये कृतश्रमः समासादितव्यवहारपरिस्पन्दसौन्दर्यातिशयः श्लाघनीयफलभाग् भवतीति।

**हिन्दी**—व्यवहार अर्थात् लोकवृत्त का व्यापार क्रिया क्रम रूपी, जिसका सौन्दर्य उसके व्यवहार करने वालों द्वारा सत्काव्य की प्राप्ति से ही (कमनीय काव्य परिज्ञान से ही) प्राप्त किया जाता है अन्य द्वारा नहीं। कैसा वह सौन्दर्य? नूतन औचित्य वाला। नूतन या अभिनव—अलौकिक औचित्य। इसको कहा जा रहा है—क्योंकि महान् राजाओं आदि के व्यवहार के वर्णन करने पर उनके अङ्गभूत सभी मुख्य अमात्य आदि समुचित औचित्यपूर्ण अपने-अपने कर्त्तव्यों के व्यवहार की निपुणता से काव्य में निबद्ध समस्त व्यवहारियों के चरित्र की उपदेशता को प्राप्त करते हैं। फिर सभी कोई कमनीय काव्य में परिश्रम करके व्यवहार की कार्य परम्परा के सौन्दर्यातिशय को प्राप्त कर श्लाघ्यफल का भागीदार होता है;

**योऽसौ चतुर्वर्गलक्षणः पुरुषार्थस्तदुपार्जनविषयव्युत्पत्तिकारणतया काव्यस्य पारम्पर्येण प्रयोजनमित्याम्नातः, सोऽपि समयान्तरभावितया तदुपभोगस्य तत्फलभूताह्लादकारित्वेन तत्कालमेव पर्यवस्यति। अतस्तदतिरिक्तं किमपि सहृदयहृदयसम्वादसुभगं तदात्वरमणीयं प्रयोजनान्तरमभिधातुमाह—**

**सुधा—य इति।** यः असौ = सः। चतुर्वर्गलक्षणः = धर्मार्थकाममोक्षरूपः। पुरुषार्थः। तदुपार्जनविषयव्युत्पत्तिकारणतया = तत्पुरुषार्थचतुष्टयोपार्जनविषये व्युत्पत्तिसाधनहेतुत्वात्। काव्यस्य = काव्यबन्धस्य। पारम्पर्येण = परम्परया। प्रयोजनम् = कारणम्। इति। आम्नातः = स्वीकृतः। सः = असौ अपि। समयान्तरभावितया = काव्याध्ययनान्तरत्वात्। तदुपयोगस्य = तत्फलभूताह्लादकारित्वेन तस्य उपभोगस्य फलभूताह्लादकारित्वेन = फलरूपानन्दोत्पादकत्वेन तत्कालम् = तत्क्षणम् एव। पर्यवस्यति = समाप्ति याति। अतः = अस्माद् हेतोः। तदतिरिक्तम् तद्रहितम्। किमपि सहृदयहृदयसम्वादसुभगम् = सज्जनचित्तसम्वादसुखम्। तदात्वरमणीयम्—तस्य हृदयस्यात्वेन = अनुरूपतया रमणीयम् = मनोरमम्, तत्। प्रयोजनान्तरम् = अपरप्रयोजनम्। अभिधातुम् = कथयितुम्। आह = प्राह।



**हिन्दी**—वह जो धर्मादि चतुर्वर्गलक्षणों वाला पुरुषार्थ; जिसकी प्राप्ति के विषय में व्युत्पत्ति का कारण होने से परम्परया काव्य का प्रयोजन स्वीकार किया गया है। वह भी काव्याध्ययन के कालान्तर में होने वाला होने के कारण तत्काल ही समाप्त हो जाता है। अतः उसके अतिरिक्त कुछ भी सज्जनों के चित्त को सम्वाद-सुखद हृदयानुरूप होने के कारण मनोरम अन्य प्रयोजन भी बताने के लिए कहा है।

**चतुर्वर्गफलास्वादमप्यतिक्रम्य तद्विदाम्।**
**काव्यामृतरसेनान्तश्चमत्कारो वितन्यते ॥ ५ ॥**

**अन्वयः**—चतुर्वर्गफलास्वादम् अतिक्रम्य काव्यामृतरसेन तद्विदाम् अन्तः चमत्कारः वितन्यते।

**सुधा—चतुरिति।** चतुर्वर्गफलास्वादम्—धर्मार्थकाममोक्षफलास्वादम्। अतिक्रम्य = उल्लंघ्य। काव्यामृतरसेन = काव्यरूपसुधारसेन। तद्विदाम् = काव्यतत्त्वज्ञानाम्। अन्तः = हृदयम्। चमत्कारः = चमत्कृतिः। वितन्यते = विस्तार्यते।

**हिन्दी**—धर्मादिवर्गचतुष्टय के फल के आनन्द को छोड़कर काव्यरूपी अमृतरस से काव्य-तत्त्वज्ञों के हृदय में चमत्कार फैलाया जाता है ॥ ५ ॥

**चमत्कारो वितन्यते चमत्कृतिर्विस्तार्यते, ह्लादः पुनः पुनः क्रियत इत्यर्थः। केन—काव्यामृतरसेन। काव्यमेवामृतं तस्य रसस्तदास्वादस्तदनुभवस्तेन। क्वेत्यभिदधाति—अन्तश्चेतसि। कस्य—तद्विदाम्। तं विदन्ति जानन्तीति तद्विदस्तज्ज्ञास्तेषाम्। कथम्—चतुर्वर्गफलास्वादमप्यतिक्रम्य। चतुर्वर्गस्य धर्मादेः फलं तदुपभोगस्तस्यास्वादस्तदनुभवस्तमपि प्रसिद्धातिशयमतिक्रम्य विजित्य पस्पशप्रायं सम्पाद्य।**

**सुधा—चमत्कार इति।** चमत्कारो वितन्यते—चमत्कृतिर्विस्तार्यते। ह्लादः = आनन्दः। पुनः पुनः = बारंबारम् क्रियते इत्यर्थः। केन—काव्यामृतरसेन। काव्यामेवामृतं तस्य रसस्तदास्वादः = तदनुभवस्तेन। क्वेत्यभिदधाति—अन्तश्चेतसि = हृदि। कस्य? तद्विदाम्। तं विदन्ती जानन्तीति तद् विदस्तज्ज्ञास्तेषाम्। कथम् = चतुर्वर्गफलास्वादम् = धर्मादिपुरुषार्थफलानन्दम् अपि अतिक्रम्य। चतुर्वर्गस्य = धर्मादेः फलं तदुपभोगस्तस्यास्वादः = तदनुभवः तमपि प्रसिद्धातिशयमतिक्रम्य विजित्य पस्पशप्रायं सम्पाद्य।

**हिन्दी**—चमत्कार फैलाया जाता है अर्थात् बार-बार आह्लाद किया जाता है। किससे ? काव्यामृत रस द्वारा। काव्य ही अमृत है, उसी के रस के अनुभव द्वारा। कहाँ ? उत्तर है—अन्तःकरण में। किसके ? काव्यमर्मज्ञों के। उसको जो जानते हैं, उनके। किस प्रकार ? धर्मार्थकाममोक्ष के फलानुभव को जीत कर, अतः उसे निःसार बना कर।

**तदयमभिप्रायः—योऽसौ चतुर्वर्गफलास्वादः प्रकृष्टपुरुषार्थतया ,सर्वशास्त्र-प्रयोजनत्वेन प्रसिद्धः सोऽप्यस्य काव्यामृतचर्वणचमत्कारकलामात्रस्य न कामपि साम्यकलनां कर्तुमर्हतीति। दुःश्रव-दुर्भण-दुरधिगमत्वादिदोषदुष्टोऽध्यय-नावसर एव दुःसहदुःखदायी शास्त्रसन्दर्भस्तत्कालकल्पितकमनीयचमत्कृतेः काव्यस्य न कथञ्चिदपि स्पर्धामधिरोहतीत्येतदप्यर्थतोऽभिहितं भवति।**

**सुधा**—तदिति। तत् = तस्य। अयम् = एषः। अभिप्रायः = आशयः। यः असौ = सः। चतुर्वर्गफलास्वादः = धर्मादिपुरुषार्थफलानुभवः। प्रकृष्टपुरुषार्थतयासर्वशास्त्र-प्रयोजनत्वेन = समस्तशास्त्रकारणत्वेन प्रसिद्धः सः अपि अस्य काव्यामृतचर्वणचमत्कार-कलामात्रस्य न कामपि साम्यकलनां = समताम्। कर्तुं = विधातुमर्हति। दुःश्रव-दुर्भण-दुरधिगमत्वादि-दोष-दुष्टोऽध्ययनावसर एव दुःसह दुःखदायी शास्त्रसन्दर्भस्तत्काल कल्पित-कमनीयचमत्कृतेः काव्यस्य न कथञ्चिद् अपि स्पर्धामधिरोहतीत्येतदप्यर्थतोऽभिहितं = कथितम् भवति।

**हिन्दी**—इसका अभिप्राय यह है—जो वह चतुर्वर्ग फल का आनन्द उत्कृष्ट पुरुषार्थता के द्वारा समस्त शास्त्रों रूप प्रयोजन से प्रसिद्ध है वह भी इस काव्य रूपी अमृत पान की चमत्कार कला मात्र की कोई समानता करने योग्य नहीं है। कर्ण कटु, उच्चारण में कठिन तथा दुर्बोधत्वादि दोषों को दुष्टता वाला, अध्ययन के अवसर पर ही दुःसह दुःखदायी शास्त्र-प्रसंग तत्काल कल्पित मनोरम चमत्कार वाले काव्य की स्पर्धा (समता किसी प्रकार भी नहीं कर सकता है यह बात भी अर्थ से स्पष्ट हो जाती है।)

**कटुकौषधवच्छास्त्रमविद्याव्याधिनाशनम्।**
**आह्लाद्यमृतवत्काव्यमविवेकगदापहम् ॥ ७ ॥**

**अन्वयः**—शास्त्रं कटुकौषधवत् अविद्याव्याधिनाशनं (भवति)। काव्यम् आह्लाद्य-मृतवत् अविवेकगदापहम् (भवतीति)।

**सुधा**—कटुकेति। शास्त्रम् = शास्त्रज्ञानम्। कटुकौषधवत् = कटुरसभेषजवत्। अविद्याव्याधिनाशनम् = अज्ञानरोगविनाशकरम् भवति। काव्यम् = कविकृतिः। आह्लाद्यमृतवत्—आह्लादिः = मनोरञ्जकत्वरूपं यदमृतं तद्वत्। अविवेकगदापहम् = अज्ञानरूपरोगापहरणम् भवति।

**हिन्दी**—शास्त्र कडुई औषधि के समान अविद्या रूपी व्याधि का नाश करने वाला होता है। काव्य आह्लादि अमृत रस के समान अविवेकरूपी रोग का विनाश करता है ॥ ७ ॥



**आयात्यां च तदात्वे च रसनिस्यन्दसुन्दरम्।**
**येन सम्पद्यते काव्यं तदिदानीं विचार्यते ॥ ८ ॥**

**इत्यन्तरश्लोकौ ॥ ५ ॥**

**अन्वय**—काव्यम् आयात्यां च तदात्वे च रसनिस्यन्दसुन्दरं येन सम्पद्यते, इदानीं तत् विचार्यते।

**सुधा**—आयात्यामिति। काव्यम् = कविकर्म। आयात्याम् = अध्ययनावसरे च। तदात्वे च = तत्प्राप्त्यनन्तरं च। रस-निस्यन्द-सुन्दरम्—रस-निस्यन्देन = आनन्दप्रवाहेण सुन्दरम् = मनोहरम्। येन = यत्तत्त्वेन। सम्पद्यते = भवति। इदानीम् = साम्प्रतम्। तद्विचार्यते = वर्ण्यते।

**हिन्दी**—काव्य अध्ययन के आरम्भ में तथा अध्ययन करने के अनन्तर आनन्द प्रवाह से जिस तत्त्व के द्वारा सुन्दर बन जाता है अब उस तत्त्व का विवेचन किया जा रहा है।

ये दो अन्तर श्लोक हैं।

**अलङ्कृतिरलङ्कार्यमपोद्धृत्य विवेच्यते।**
**तदुपायतया तत्त्वं सालङ्कारस्य काव्यता ॥ ६ ॥**

**अन्वय**—अलङ्कृतिः अलङ्कार्यम् उपोद्धृत्य विवेच्यते। तदुपायतया सा अलंकारस्य काव्यता।

**सुधा**—अलङ्कृतिरिति। अलङ्कृतिः = अलङ्कारः। अलङ्कार्यम् = वाच्यवाचकम्। उपोद्धृत्य = पृथक्-पृथक् कृत्वा। विवेच्यते = वर्ण्यते। तत् उपायतया = उपायत्वेन। सा = असौ अलङ्कारस्य काव्यता भवति।

**हिन्दी**—अलङ्कृति अर्थात् अलङ्करण जिसके द्वारा अलङ्कृत किया जाता है विग्रहा-नुसार उसे अलङ्कृति कहते हैं, उसका विवेचन किया जा रहा है। उसकी उपायता से अलङ्कार का तत्त्व अलङ्कार्य शब्द तथा अर्थ की वह काव्यता होती है ॥ ६ ॥

**अलङ्कृतिरलङ्करणम् अलङ्क्रियते ययेति विगृह्य। सा विवेच्यते विचार्यते। यच्चालङ्कार्यमलङ्करणीयं वाचकरूपं वाच्यरूपं च तदपि विवेच्यते। तयोः सामान्यविशेषलक्षणद्वारेण स्वरूपनिरूपणं क्रियते। कथम्—अपोद्धृत्य। निष्कृष्य पृथक् पृथगवस्थाप्य, यत्र समुदायरूपे तयोरन्तर्भावस्तस्माद्विभज्य। केन हेतुना—तदुपायतया। तदिति काव्यं परामृश्यते। तस्योपायस्तदुपायस्तस्य भावस्तदुपायता तया हेतुभूतया। तस्मादेवंविधो विवेकः काव्यव्युत्पत्त्युपायतां प्रतिपद्यते। दृश्यते च समुदायान्तःपातिनामसत्यभूतानामपि व्युत्पत्तिनिमित्तम-पोद्धृत्य विवेचनम्। यथा—पदान्तर्भूतयोः प्रकृतिप्रत्यययोर्वाक्यान्तर्भूतानां पदानां चेति। यद्येवमसत्यभूतोऽप्यपोद्धारस्तदुपायतया क्रियते तत् किं पुनः सत्यमि-**

**त्याह--तत्त्वं सालङ्कारस्य काव्यता। अयमत्र परमार्थः—सालङ्कारस्यालङ्करण-सहितस्य सकलस्य निरस्तावयवस्य सतः समुदायस्य काव्यता कविकर्मत्वम्। तेनालङ्कृतस्य काव्यत्वमिति स्थितिः, न पुनः काव्यस्यालङ्कारयोग इति।**

**सुधा—अलङ्कृतिरिति।** अलङ्कृतिः अलङ्करणम्—अलङ्क्रियते ययेति विगृह्य। सा=अलङ्कृतिः। विवेच्यते=विचार्यते। यच्चालङ्कार्यम्=अलङ्करणीयं वाचकरूपं वाच्यरूपं च तदपि विवेच्यते। तयोः सामान्यविशेषलक्षणद्वारेण स्वरूपनिरूपणं क्रियते। कथम्? अपोद्धृत्य=निष्कृष्य, पृथक् पृथक्, अवस्थाप्य, यत्र समुदायरूपे तयोरन्तर्भावः तस्माद् विभज्य=विभागं कृत्वा। केन हेतुना? तदुपायतया। तदिति काव्यं परामृश्यते। तस्योपायस्तस्यभावस्तदुपायता, तया हेतुभूतया। तस्मादेवंविधो विवेकः काव्यव्युत्पत्त्यु-पायतां प्रतिपद्यते। दृश्यते च समुदायान्तःपातिनाम् असत्यभूतानामपि व्युत्पत्तिनिमित्तम-पोद्धृत्य विवेचनम्। यथा—पदान्तर्भूतयोः प्रकृति-प्रत्यययोः वाक्यान्तर्भूतानां पदानां चेति। यद्येवमसत्यभूतोऽप्यपोद्धारस्तदुपायतया क्रियते तत् किं पुनः सत्यमित्याह—तत्त्वं सालङ्कारस्य काव्यता। अयमत्र परमार्थः—सालङ्कारस्य=अलङ्करणसहितस्य सकलस्य निरस्तावयवस्य सतः समुदायस्य काव्यता=कविकर्मत्वम्। तेनालङ्कृतस्य काव्यत्वमिति स्थितिः, न पुनः काव्यस्यालङ्कारयोग इति।

**हिन्दी—**जिसके द्वारा अलङ्करण किया जाता है उसे अलङ्कृति कहते हैं। उसका विवेचन किया जा रहा है जो अलङ्कार्य अर्थात् अलङ्करणीय-वाचक वाच्य रूप है, उसका भी विवेचन किया जा रहा है। उन दोनों के सामान्य तथा विशेष लक्षणों से स्वरूप-निरूपण किया जाता है। किस प्रकार? अपोद्धृत्य अर्थात् निकाल कर—पृथक्-पृथक् स्थापित कर जहाँ समुदाय रूप में उन दोनों को अन्तर्भाव से विभक्त कर। किस कारण? उसकी उपायता से। 'तत्' अर्थात् काव्य पर विचार किया जाता है। उसका उपाय, तदुपाय तथा उसका भाव तदुपायता कहलाती है। उसके द्वारा करणरूप होने से। उससे इस प्रकार का विवेक काव्य विवेचन की उपायता को प्रतिपादित करता है। और देखा जाता है कि समुदाय के अन्तर्गत स्थित असत्यभूतपदार्थों की व्युत्पत्ति के लिए पृथक्-पृथक् विवेचन किया जाता है। यथा—पदान्तर्भूत प्रकृति और प्रत्यय का विवेचन तथा वाक्य के अन्तर्भूत पदों का भी विवेचन मीमांसा शास्त्र में पाया जाता है। यदि इस प्रकार असत्यभूत भी अपोद्धार (अलङ्कार तथा अलङ्कार्य का पृथक्-पृथक् विवेचन) उस काव्य की उपायता से किया जाता है तो फिर सत्य क्या है? इसका उत्तर है—अलङ्कारयुक्त तत्त्व की ही काव्यता होती है। इसका निष्कृष्ट अर्थ यह हुआ कि अलङ्करण सहित समस्त निरस्त अवयव होने पर ही समुदाय की काव्यता या कविकर्मत्व होता है। उससे अलङ्कृत की काव्यत्व स्थिति होती है न कि काव्य का अलङ्कार से योग।

**सालङ्कारस्य काव्यतेति सम्मुग्धतया किञ्चित् काव्यस्वरूपमासूत्रितम्, निपुणं पुनर्न निश्चितम्। किंलक्षणं वस्तु काव्यव्यपदेशभाग् भवतीत्याह—**



**सुधा—सालङ्कारस्येति।** सालङ्कारस्य=अलङ्कारयुक्तस्य। काव्यता=काव्यत्वमिति। संमुग्धतया=सम्मोहेन किञ्चित् काव्यस्वरूपम्=काव्यलक्षणम्। आसूत्रितम्=आग्रथि-तम्। निपुणम्=समीचीनम्। पुनः न निश्चितम्=नैव नियतम्। किं लक्षणं वस्तु=किं रूपं वस्तु। काव्यव्यपदेशभाग्=काव्यसंज्ञात्मकम् भवतीति।

**हिन्दी—**अलङ्कार युक्त की काव्यता होती है। इस प्रकार सम्मोह से (भ्रमवश) काव्य का कुछ स्वरूप निश्चित किया गया है किन्तु वह निपुणता से निर्धारित नहीं किया गया है। किस लक्षण वाली वस्तु काव्यसंज्ञक होती है इसे कहते हैं—

**शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि।**
**बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि ॥ ७ ॥**

**अन्वय—**वक्र कविव्यापारशालिनि तद्विदाह्लादकारिणि बन्धे व्यवस्थितौसहितौ-शब्दार्थौ काव्यम्।

**सुधा—शब्दार्थाविति।** वक्रकविव्यापारशालिनि=वक्रशास्त्रादिप्रसिद्धशब्दार्थोपनिब-न्धनेन भिन्नम्, कविव्यापारशालिनि=कविव्यापारशोभिते। तद्विदाह्लादकारिणि=काव्यतत्त्वज्ञानन्दकारिणि। बन्धे=काव्ये। व्यवस्थितौ=विशिष्टरूपेणावस्थितौ। सहितौ=सहभावेन युक्तौ शब्दार्थौ=शब्दश्च, अर्थश्चोभौ। काव्यं भवति।

**हिन्दी—**शास्त्रादिप्रसिद्ध शब्द तथा अर्थ के उपनिबन्धन से भिन्न कविव्यापार से शोभित काव्यतत्त्वज्ञों को आनन्दित करने वाले काव्य में विशेष रूप से स्थित सहभाव से युक्त शब्द तथा अर्थ दोनों मिलकर काव्य होता है ॥ ७ ॥

**शब्दार्थौ काव्यं वाचको वाच्यश्चेति द्वौ सम्मिलितौ काव्यम्। द्वावेकमिति विचित्रैवोक्तिः। तेन यत्केषांचिन्मतं कविकौशलकल्पितकमनीयतातिशयः शब्द एव केवलं काव्यमिति केषांचिद् वाच्यमेव रचनावैचित्र्यचमत्कारकारि काव्यमिति, पक्षद्वयमपि निरस्तं भवति। तस्माद् द्वयोरपि प्रतितिलमिव तैलं तद्विदाह्लाद-कारित्वं वर्तते, न पुनरेकस्मिन्। यथा—**

**सुधा—शब्दार्थाविति।** शब्दार्थौ=शब्दश्चार्थश्च। काव्यं वाचकः वाच्यश्चेति द्वौ सम्मिलितौ=संयुक्तौ काव्यम्। द्वौ एकम् इति विचित्रैवोक्तिः। तेन यत्केषांचिन् मतं कविकौशलकल्पितकम्। नीयतातिशयः=काव्यकल्पितरमणीयातिशयः। शब्द एव केवलं काव्यमिति केषांचिद् वाच्यमेव=अर्थमेव। रचनावैचित्र्यचमत्कारकारि=अद्भुत-रचनाचमत्कारकारि। काव्यम् इति, पक्षद्वयमपि निरस्तम्=समाप्तम् भवति। तस्मात्=ततः। द्वयोरपि=उभयोरपि प्रतितिलमिव तैलम् तद्विदामाह्लादकारित्वम्=काव्य-तत्त्वज्ञानन्दकारिता। वर्तते न पुनः एकस्मिन्। यथा—

**हिन्दी—**शब्द और अर्थ काव्य होते हैं अर्थात् वाचक और वाच्य यह दोनों ही सम्मिलित रूप काव्य होता है। 'दोनों' यह विचित्र ही कथन है। उससे जो किन्हीं का मत कविकौशलकल्पितकमनीयतातिशय शब्द ही केवल काव्य होता है। तथा कुछ

Scanned with CamScanner

विद्वानो के अनुसार वाच्य ही रचनावैचित्र्य-चमत्कार को करने वाला काव्य होता है। इस प्रकार दोनों पक्ष निरस्त हो जाते हैं। इससे दोनों में ही प्रत्येक तिल में तेल होने के समान काव्यतत्त्वज्ञों को आह्लादकारिता वर्तमान है, केवल एक में नहीं। जिस प्रकार—

भण तरुणि रमणमन्दिरमानन्दस्यन्दिसुन्दरेन्दुमुखि।
यदि सल्लीलोल्लापिनि गच्छसि तत् किं त्वदीयं मे॥ ९॥
अनणुरणन्मणिमेखलमविरतशिञ्जानमञ्जुमञ्जीरम्।
परिसरणमरुणचरणे रणरणकमकारणं कुरुते॥ १०॥

**अन्वयः**—हे आनन्दस्यन्दिसुन्दरेन्दुमुखि! सल्लीलोल्लापिनि! अरुणचरणे! भण, यदि रमणमन्दिरं गच्छसि तत् त्वदीयम् अनणुरणन्मणिमेखलम् अविरतशिञ्जानमञ्जु-मञ्जीरं परिसरणम् अकारणं मे रणरणकं किम् कुरुते।

**सुधा—भणेति**। हे आनन्दस्यन्दिसुरेन्दुमुखि—आनन्दं स्यन्दते यस्मात् तद् आनन्द-स्यन्दि, सुन्दरम् = रामणीकम्, इन्दुः = चन्द्र इव मुखम् = आननम् यस्यास्तत्सम्बुद्धौ = आह्लादस्यन्दिरमणीयचन्द्रानने! सल्लोलोल्लापिनि—सल्लीलाभिः = उत्तमक्रीडाभिः। उत् उच्चैः आलपते = भाषते या सा, तत्सम्बुद्धौ। अरुणचरणे—अरुणौ चरणौ यस्यास्तत्सम्बोधने = रक्तचरणे। तरुणि = युवति। भण = कथय। यदि = चेत्। रमण-मन्दिरम् = केलिगृहम्। गच्छसि = यासि। तत् = तर्हि। त्वदीयम् = तव। अनुरणन्मणि मेखलम्—अनुरणन्ती मणिमेखला यस्मिन् तत् = क्वणन्मेखलम्। अविरतशिञ्जान-मञ्जुमञ्जरीम्—अविरतम् = निरन्तरम् शिञ्जानमञ्जुमञ्जरीम् = मधुर नूपुररणनम्। अकारणम् = निष्प्रयोजनम्। परिसरणम् = इतस्ततः परिभ्रमणम्। मे = मम। रणरण-कम् = आकुलताम्। किं कुरुते = विदधातीति।

**हिन्दी**—हे आनन्द बिखेरने वाले सुन्दर चन्द्रमा सदृश मुख वाली! अपनी उत्तम क्रीडाओं के विलास के साथ-साथ जोर से आलाप करने वाली, अरुण चरणों वाली युवति! तुम जब अपने प्रेमी के रमण मन्दिर को जाती हो तब तुम्हारा बजता हुआ मणि मेखला वाला निरन्तर नूपुरध्वनियुक्त अकारण इधर-उधर घूमना मेरे हृदय को क्यों आकुलित कर देता है॥ ९-१०॥

**प्रतिभादारिद्र्यदैन्यादतिस्वल्पसुभाषितेन कविना वर्णसावर्ण्यरम्यतामात्र-मत्रोदितम्, न पुनर्वाच्यवैचित्र्यकणिका काचिदस्तीति।**

**सुधा—प्रतिभेति**। प्रतिभादारिद्र्यदैन्यात्—प्रतिभायाः दारिद्र्यम् = प्रज्ञादरिद्रता, तस्य यद् दैन्यम् = दीनता, तस्मात्। अतिस्वल्पसुभाषितेन = अतिन्यूनसूक्तिवचनेन कविना = सूरिणा। वर्णसावर्ण्यरम्यतामात्रम् = अक्षरसाम्यरमणीयतामात्रम्। उदितम् = कथितम्। पुनः = भूयः। काचित् = कापि। वाच्यवैचित्र्यकणिका = वर्ण्यवैचित्र्यलेशम् अपि नोदितम्।



**हिन्दी**—इन श्लोकों में प्रतिभादारिद्र्य की दीनता से अत्यल्प सुभाषण वाले कवि ने अक्षरों की समानता की रमणीयता मात्र का वर्णन किया है किसी प्रकार का उक्ति-वैचित्र्य कथन तक नहीं किया है।

**यत्किल नूतनतारुण्यरङ्गितलावण्यपटहकान्तेः कान्तायाः कामयमानेन केनचिदेतदुच्यते—यदि त्वं तरुणि रमणमन्दिरं व्रजसि तत्किं त्वदीयं परिसरणं रणरणकमकारणं मम करोतीत्यतिग्राम्येयमुक्तिः। किं च न अकारणम्, यतस्तस्यास्तदनादरेण गमनेन तदनुरक्तान्तःकरणस्य विरहविधुरताशङ्का-कातरता कारणं रणरणकस्य। यदि वा परिसरणस्य मया किमपराद्धमित्य-कारणतासमर्पकम्, एतदप्यतिग्राम्यतरम्। सम्बोधनानि च बहूनि मुनिप्रणीत-स्तोत्रामन्त्रणकल्पानि न काञ्चिदपि तद्विदामाह्लादकारितां पुष्णन्तीति यत्कि-ञ्चिदेतत्।**

**सुधा—यदिति**। किल = खलु। यत् नूतनतारुण्यरङ्गितलावण्यपटहकान्तेः—नूतनेन = अभिनवेन तारुण्येन = यौवनेन रङ्गिता लावण्यपटहकान्तिः = मनोरमपटह-शोभा यस्यास्तस्याः कान्तायाः = मनोरमायाः। कामयमानेन = इच्छुकेन। केनचित् प्रियतमेन। एतत् = इदम्। उच्यते = कथ्यते। यदि = चेत्। त्वम्, तरुणिरमणमन्दिरम् = युवतिकेलि-सदनम्। व्रजसि = गच्छसि। तत् = तर्हि किं त्वदीयम् = तावकीनम्। परिसरणम् = गमनम् रणरणकम्, अकारणम् = व्यर्थम्, मम = मे। करोति। इति इयम् = एषा ग्राम्या = ग्रामीणा। उक्तिः = कथनम्। किञ्च = किन्तु। न अकारणम् = अनायासम् यतः = हि। तस्याः। तद् अनादरेण = आदरहितेन। गमनेन = प्रयाणेन। तदनुरक्तान्तःकरणस्य = तदासक्तचेतसः। विरहविधुरताशङ्काकातरता—विरहस्य = वियोगस्य विधुरतायाः = व्याकुलतायाः या शङ्का = सन्देहः, तस्याः कातरता। रणरणकस्य = आकुलतायाः कारणम् = हेतुः। वा = अथवा। यदि। परिसरणस्य = गमनस्य। मया किमपि अपराद्धम् = अपराधं कृतम्। इति अकारणतासमर्पकम् = अकारणतासिद्धिकारम्। एतत् = इदम् अपि। अतिग्राम्यतरम् = अत्यन्तग्रामीणम्। सम्बोधनानि = सम्बोधनशब्दाः। च बहूनि मुनिप्रणीतस्तोत्रामन्त्रणकल्पानि = ऋषिरचितस्तोत्रामन्त्रणकल्पानि। न काञ्चि-दपि = न कामपि। तद्विदाम् = तदभिज्ञानाम्। आह्लादकारिताम् = आनन्दकरत्वम्। पुष्णन्ति = पोषणं कुर्वन्ति। इति यत् किञ्चित् एतत् = इदम्।

**हिन्दी**—वास्तव में जो नवयौवन से रञ्जित लावण्य के कारण सुन्दर कान्ति वाली कामिनी की कामना करते हुए कोई व्यक्ति यह कहता है कि हे तरुणि! यदि तुम रमणमन्दिर (पतिगृह) को जा रही हो तो तुम्हारा गमन मेरे हृदय को अकारण व्यथित कर देता है। यह अत्यन्त ग्राम्य उक्ति है किन्तु अकारण नहीं। क्योंकि उसके उस अनादर गमन के कारण कामिनी में अनुरक्त अन्तःकरण में विरहव्याकुलशङ्का से उत्पन्न हुई कातरता कामुक हृदय को व्याकुल करने का कारण है। अथवा यदि तुम्हारे गमन के सम्बन्ध में मैंने क्या अपराध किया है? यह अकारणता को सिद्ध करने वाला



Scanned with CamScanner

हो तो यह भी अत्यन्त ग्राम्योक्ति है। तथा बहुत से सम्बोधन मुनियों द्वारा प्रणीत स्तोत्रों के समान किसी प्रकार की भी काव्यतत्त्वज्ञों की आह्लादकारिता का पोषण नहीं करते हैं। अतएव यह व्यर्थ है।

**वस्तुमात्रं च शोभातिशयशून्यं न काव्यव्यपदेशमर्हति। यथा—**

**सुधा**—वस्तुमात्रमिति। शोभातिशयशून्यम् = अत्यन्तशोभाहीनम्। वस्तुमात्रम् = केवलं वस्तु। काव्य-व्यपदेशम् = काव्यसंज्ञाम्। न अर्हति = योग्यं न भवति। यथा—

**हिन्दी**—अत्यन्त शोभा-शून्य वस्तुमात्र काव्य संज्ञा होने योग्य नहीं होती है। यथा—

**प्रकाशस्वाभाव्यं विदधति न भावास्तमसि यत्**
**तथा नैते ते स्युर्यदि किल तथा तत्र न कथम्।**
**गुणाध्यासाभ्यासव्यसनदृढदीक्षागुरुगुणो**
**रविव्यापारोऽयं किमथ सदृशं तस्य महसः॥ ११॥**

**अन्वयः**—तमसि यत् प्रकाशस्वाभाव्यं भावाः न विदधति एते तेन स्युः यदि किल तत्र तथा कथं न। अथ अयम् गुणाध्यासाभ्यासव्यसनदृढदीक्षागुरुगुणः। रविव्यापारः तस्य महसः सदृशम् किम्।

**सुधा**—प्रकाशेति। तमसि = अन्धकारे। यत् प्रकाशस्वाभाव्यम् = प्रकृतिप्रकाशत्वम्। भावाः न विदधति = नैव कुर्वंति। तथा एते=इमे। ते न स्युः = न भूयुः। यदि किल = खलु। तत्र = तस्मिन् तथाकथं न = केनापि प्रकारेण न भवतु। अयम् = एषः। गुणाध्यासाभ्यासव्यसनदृढदीक्षागुरुगुणः—गुणानामध्यासस्तस्य योऽभ्यासस्तस्य व्यसनस्य = विनाशस्य दृढा दीक्षा, तस्यां गुरुः गुणः यस्य सः। रविव्यापारः—रवेः = सूर्यस्य व्यापारः = क्रियाकलापः। तस्य = उक्तस्य। महसः = ज्योतेः सदृशम् = समम् किं भवितुमर्हति।

**हिन्दी**—अन्धकार में जो स्वाभाविक प्रकाश के भाव धारण नहीं कर सकतीं हैं वे वस्तुएँ वैसी हो ही न पायें, वास्तव में यदि वहाँ पर वैसी चीज किसी प्रकार न हो। अन्धकार को गुणों में अभ्यास के विनाश की दृढ़ शिक्षा देने में समर्थ गुणों वाले सूर्य का व्यापार उस ज्योति के सदृश और क्या हो सकता है॥ ११॥

**अत्र हि शुष्कतर्कवाक्यवासनाधिवासितचेतसा प्रतिभाप्रतिभातमात्रमेव वस्तु व्यसनितया कविना केवलमुपनिबद्धम्। न पुनर्वाचकवक्रताविच्छित्तिलवोऽपि लक्ष्यते। यस्मात्तर्कवाक्यशय्येव शरीरमस्य श्लोकस्य। तथा च—तमोव्यतिरिक्ताः पदार्था धर्मिणः, प्रकाशस्वभावा न भवन्तीति साध्यं तमस्य तथाभूतत्वादिति हेतुः। दृष्टान्तस्तर्हि कथं न दर्शितः, तर्कन्यायस्यैव चेतसि प्रतिभासमानत्वात्। तथोच्यते—**



**सुधा**—अत्रेति। हि = अतः। अत्र = अस्मिन् श्लोके। शुष्कतर्कवाक्यवासनाधिवासितचेतसा—शुष्कस्य तर्कवाक्यस्य या वासना तया अधिवासितं चेतो यस्य सः, तेन = नीरसतर्कवाक्यवासनापूरितमनसा। कविना = सूरिणा। प्रतिभाप्रतिभातमात्रमेव—प्रतिभया=बुद्धया प्रतिभातमात्रम्=प्रतीतिमात्रम्। एव। वस्तुव्यसनितया = कविताव्यसनहेतुना। केवलम् = मात्रम्। उपनिबद्धम् = वर्णितम्। पुनः = भूयः। वाचकवक्रताविच्छित्तिलवः = शब्दवक्रताशोभालेशः अपि। न लक्ष्यते = नैव दृश्यते। यस्मात् = यतः। तर्कवाक्यशय्या एव = तर्कवाक्याधिवास एव। अस्य = एतस्य श्लोकस्य। शरीरम् = कलेवरम्। तथा च—तमोव्यतिरिक्ताः = अन्धकाररहिताः। पदार्थाः = वस्तूनि। धर्मिणः प्रकाशस्वभावाः = प्रकृत्या प्रकाशकराः, न भवन्ति। इति साध्यम् = प्रतिज्ञावाक्यम्। तमसि = अन्धकारे। अतथाभूतत्वात् = अप्रकाशस्वभावत्वात्। इति हेतुः = कारणम्। तर्हि = ततः। दृष्टान्तः = उदाहरणम्। कथं न दर्शितः = प्रदर्शितः। तर्कन्यासस्य = तर्कः न्यासो यस्य सः तस्य एव। चेतसि = मनसि। प्रतिभासमानत्वात् = प्रतिभासत्वहेतोः। तथा उच्यते = कथ्यते।

**हिन्दी**—इस श्लोक में शुष्क तर्क वाक्य की वासना से अधिवासित चित्त वाले कवि ने प्रतिभा से प्रतीत मात्र वस्तु व्यसन के कारण केवल उपनिबद्ध की है न कि शब्दवक्रता की शोभा का इसमें लेशमात्र भी दिखाई नहीं पड़ता है क्योंकि तर्कवाक्य की शय्या ही इस श्लोक का शरीर है और फिर अन्धकार के अतिरिक्त पदार्थ रूप धर्मी प्रकाश स्वभाव वाले नहीं होते हैं यह साध्य है। अन्धकार में प्रकाश स्वभाव न होने से यह हेतु है। प्रश्न यह है कि यदि ऐसा है तो दृष्टान्त प्रदर्शित क्यों नहीं किया? इसका उत्तर है कि चित्त में तर्कन्यास के ही प्रतिभासित होने के कारण से। जैसा कि यहा जाता है—

**तद्भावहेतुभावौ हि दृष्टान्ते तदवेदिनः।**
**स्थाप्येते विदुषां वाच्यो हेतुरेव हि केवलः॥ १२॥**

**अन्वयः**—हि दृष्टान्ते तद्भावहेतु भावौ तद् अवेदिनः स्थाप्येते। हि विदुषां वाच्यः केवलः हेतुः एव।

**सुधाः**—तदिति। हि = यतः। दृष्टान्ते तद्भावहेतुभावौ—तत्=तस्य भावः हेतोः भावश्च, तौ तदवेदिनः = तदपरिचितजनस्य। स्थाप्येते=क्रियेते। हि = यतः। विदुषाम् = तत्परिचितानाम् सुविज्ञानाम्। केवलः = मात्रम्। वाच्यः = शब्दः। हेतुः एव कथ्यते।

**हिन्दी**—दृष्टान्त में उसकी सत्ता तथा हेतु को स्थापित किया जाता है परन्तु विद्वानों के लिए तो केवल वाच्य ही हेतु कहा जाता है॥ १२॥

**विदधतीति विपूर्वो दधातिः करोत्यर्थे वर्तते। स च करोत्यर्थोऽत्र न सुस्पष्टसमन्वयः, प्रकाशस्वाभाव्यं न कुर्वन्तीति। प्रकाशस्वाभाव्यशब्दोऽपि चिन्त्य एव। प्रकाशः स्वभावो यस्यासौ प्रकाशस्वभावः, तस्य भाव भावप्रत्यये विहिते पूर्व-**

Scanned with CamScanner

**पदस्य वृद्धिः प्राप्नोति। अथ स्वभावस्य भावः स्वभाव्यमित्यत्रापि भावप्रत्यया-न्ताद्भावप्रत्ययो न प्रचुरप्रयोगार्हः। तथा च प्रकाशश्चासौ स्वाभाव्यं चेति विशेषणसमासोऽपि न समीचीनः।**

सुधा—विदधतीति। विदधति = विपूर्वो दधाति = करोति इत्यर्थे वर्तते। स च करोति अर्थः अत्र न सुस्पष्टसमन्वयः = स्पष्टतया नैव समन्वितो भवति, प्रकाशस्वाभाव्यं न कुर्वन्तीति। प्रकाशस्वाभाव्यशब्दः अपि चिन्त्यः = विचारणीय एव। प्रकाशः स्वभावो यस्यासौ प्रकाशस्वभावः, तस्य भावः इति भावप्रत्यये विहिते = कृते पूर्वपदस्य वृद्धिः प्राप्नोति। अथ स्वभावस्य भावः स्वाभाव्यम् इति अत्रापि भाव प्रत्ययान्तात् भाव-प्रत्ययो न प्रचुरप्रयोगार्हः = बहुप्रयोगयोग्यः। तथा च प्रकाशश्चासौ स्वाभाव्यं चेति विशेषणसमासः। अपि न समीचीनः = शोभनः।

हिन्दी—'विदधाति' यहाँ पर 'वि' पूर्व दधाति इस अर्थ में विद्यमान है और करोति यह अर्थ यहाँ पर स्पष्ट रूप से समन्वित नहीं होता है। प्रकाशस्वाभाव्य शब्द भी विचारणीय ही है। प्रकाश है स्वभाव जिसका, उसे प्रकाशस्वाभाव्य कहते हैं उसका भाव अर्थात् भाव प्रत्यय करने पर पूर्वपद की वृद्धि प्राप्त होती है। स्वभाव का भाव भी स्वाभाव्य होता है यहाँ पर भाव प्रत्ययान्त से भाव प्रत्यय अधिक प्रयोग करने योग्य नहीं है और "प्रकाशश्चासौ स्वाभाव्यञ्च" यह विशेषण समास भी ठीक नहीं है।

**तृतीये, च पादेऽत्यन्तासमर्पकसमासभूयस्त्ववैशसं न तद्विदाह्लादकारिता-मावहति। रविव्यापार इति रवि-शब्दस्य प्राधान्येनाभिमतस्य समासे गुणीभावो न विकल्पितः, पाठान्तरस्य 'रवेः' इति संभवात्।**

सुधा—तृतीय इति। तृतीये पादे = चरणे। अत्यन्तासमर्पकसमासभूयस्त्ववैशसम्—अत्यन्तम् असमर्पकम् = अर्थबोधबाधकम्, समासभूयस्त्वम् = समासबहुलत्वम्, तेन यत् वैशसं—कष्टं तत्। तद्विदाह्लादकारिताम्—तद्विदाम्=काव्यतत्त्वज्ञानाम् आह्लादकारिताम्—आनन्दकरत्वम्। न आवहति। समासभूयस्त्वं काव्यानन्दे बाधकमित्यर्थः। रविव्यापार इति शब्दः, चतुर्थचरणे प्रयुक्तः। तत्रापि 'रवि'-शब्दस्य, प्राधान्येन = प्रधानतायाः। अभिमतस्य = सम्मतस्य। समासे गौणभावेन प्रयुक्ते सति कविना न प्राधान्यरक्षायां प्रयत्नः कृतः। यतः पाठान्तरस्य पाठभेदे कृते सति 'रवेः' इति पृथक्पदस्य सम्भवात्। न तत्रापि छन्दोभङ्गः स्यादित्यर्थः।

हिन्दी—तथा तृतीय चरण में अत्यन्त असमंपक-समास बहुल रूप कष्ट काव्यतत्त्वज्ञों की आह्लादकारिता को धारण नहीं करता है। 'रविव्यापारः' इसमें (विशब्द की प्रधानता अभिमत होने पर भी समास में गुणीभाव नहीं बचाया गया है। रवि के पाठान्तर की सम्भावना से।

**ननु वस्तुमात्रस्याप्यलङ्कारशून्यतया कथं तद्विदाह्लादकारित्वमिति चेत्तन्न; यस्मादलङ्कारेणाप्रस्तुतप्रशंसालक्षणेनान्यापदेशतया स्फुरितमेव कविचेतसि।**



**प्रथमं च प्रतिभाप्रतिभासमानमघटितपाषाणशकलकल्पमणिप्रख्यमेव वस्तु विदग्धकवि-विरचितवक्रवाक्योपारूढं शाणोल्लीढमणिमनोहरतया तद्विदाह्लाद-कारिकाव्यत्वमधिरोहति। तथा चैकस्मिन्नेव वस्तुन्यवहितानवहितकवित्रिद्वितय-विरचितं वाक्यद्वयमिदं महदन्तरमावेदयति—**

सुधा—नन्विति। ननु = खलु। वस्तुमात्रस्य = केवलं वस्तुनः अपि। अलङ्कार-शून्यतया = अलङ्काराणां रिक्ततया। तद्विदाह्लादकारित्वम्—तद्विदाम् = काव्यमर्मज्ञानाम् आह्लादकारित्वम् = आनन्ददायित्वम्। कथम् = केन प्रकारेण भवतीति। चेत्। तन्न। यस्मात् यतः। अलङ्कारेण अप्रस्तुतप्रशंसालक्षणेन = अप्रस्तुतप्रशंसाद्यलङ्कारेण। अन्यापदेशतया = शून्यतया। कविचेतसि = कविमनसि। स्फुरितम् एव। प्रथमं च = पूर्वं च। प्रतिभाप्रतिभासमानम्—प्रतिभायां = बुद्धौ प्रतिभासमानम् = प्रतीतम्। अघटितपाषाणशकलकल्पमणिप्रख्यम्—अघटितम् = अघर्षितम्, पाषाणशकलकल्पम् = प्रस्तरखण्डसदृशम् मणिप्रख्यम् = मणिवत् एव। वस्तु = वर्ण्यविषयम्। विदग्धकवि-रचितवक्रवाक्योपारूढम्—विदग्धैः = चतुरैः, कविभिः = सूरिभिः, विरचितम् = निर्मितम् यद् वक्रम् = चमत्कारि, वाक्यम् = श्लोकम्, तस्मिन् उपारूढम् = उपनिबद्धम् तत्। शाणोल्लीढमणिमनोहरतया—शाणे = घर्षणप्रस्तरे उल्लीढस्य = घर्षितस्य मणेः = रत्नस्य मनोहरतया = मनोरमतया। तद्विदाह्लादकारिकाव्यत्वम्—काव्यमर्मज्ञानामानन्द-कारिकविताम्। अधिरोहति = प्राप्नोति। तथा च—एकस्मिन् एव वस्तुनि = एक एव वर्ण्यविषये। अवहितानवहितकवित्रिद्वितयविरचितम्—अवहितेन=सावधानमनसा अनवहितेन =असावधानतया वा त्रिद्वितयम् = द्वित्रिप्रकारकम्। विरचितम्=रचितम्। वाक्यद्वयम्= श्लोकद्वयम्। इदम् = एतत्। महदन्तरम् = अत्यन्तभिन्नताम्। आवेदयति = प्रकटयति।

हिन्दी—वास्तव में यदि अलङ्कार से शून्य वस्तुमात्र (वर्ण्य विषय) को काव्य-मर्मज्ञों के लिए आह्लादकारित्व काव्य संज्ञा देने को तैयार नहीं है तो अप्रस्तुत प्रशंसा लक्षणों वाले अलङ्कारों से शून्य होने पर भी वस्तुमात्र में काव्य मर्मज्ञों का आह्लादकारित्व कैसे होता है? ऐसा कहना ठीक नहीं है क्योंकि अन्य लक्ष्य से मुक्त होने के कारण कवि हृदय में अप्रस्तुतप्रशंसा स्वरूप अलङ्कार स्फुरित ही होता है। पहले तो प्रतिभा से प्रतिभासित, बिना तराशे पाषाण-खण्ड सदृश मणि की भाँति ही वर्ण्यविषय-चतुर कवियों द्वारा विरचित चमत्कारपूर्ण श्लोक में उपनिबद्ध शान पर चढ़े हुए रत्न की मनोरमता से काव्यमर्मज्ञों को आनन्ददायक काव्यत्व को प्राप्त करती है और एक ही वस्तु में सावधानी या असावधानी से विभिन्न प्रकार से विरचित श्लोक भिन्न-भिन्न महान् अन्तर को सिद्ध करता है।

**मानिनीजनविलोचनपातानुष्णबाष्पकलुषानभिगृह्णन्।**
**मन्दमन्दमुदितः प्रययौ खं भीतभीत इव शीतमयूखः॥ १३॥**

अन्वयः—शीतमयूखः मानिनीजनविलोचनपातानुष्णबाष्पकलुषान् अभिगृह्णन् मन्द-मन्दम् उदितः भीतः इव खं प्रययौ।

Scanned with CamScanner

**सुधा**—मानिनीति। शीतमयूखः—शीताः मयूखाः यस्येति = शीतलकिरणश्चन्द्रः। मानिनीजनविलोचनपातान्—मानिनीजनानाम् = गर्विणीस्त्रीणाम् विलोचनाभ्यां = नयनाभ्याम् पतन्तीतिपातास्तान् = निपतितान्। उष्णबाष्पकलुषान् = तप्ताश्रुकलुषान्। अभिगृह्णन् = अङ्गीकुर्वन्। मन्दमन्दम् = शनैः शनैः। उदितः = पूर्वदिशायामुदयं गतः। भीतः = त्रस्तः। इव = यथा। खम् = आकाशम्। प्रययौ = अगात्।

**हिन्दी**—शीतल किरणों वाला चन्द्रमा मानिनी स्त्रियों के नयनों से गिरते हुए उष्ण अश्रुजल से कलुषित कटाक्षों को सहन करता हुआ धीरे-धीरे पूर्वदिशा में उदित होकर डरा हुआ-सा आकाश में पहुँच गया ॥ १३ ॥

**क्रमावेकद्वित्रि-प्रगतिपरिपाटीः प्रकटयन्**
**कलाः स्वैरं स्वैरं नवकमलकन्दाङ्कुररुचः।**
**पुरन्ध्रीणां प्रेयोविरहदहनोद्दीपितदृशां**
**कटाक्षेभ्यो बिभ्यन्निभृत इव चन्द्रोऽभ्युदयते ॥ १४ ॥**

**अन्वयः**—नवकमलकन्दाङ्कुररुचः कलाः स्वैरं स्वैरं क्रमौ एकद्वित्रि-प्रगतिपरिपाटीः प्रकटयन् प्रेयोविरहदहनोद्दीपितदृशां कटाक्षेभ्यः बिभ्यन् निभृत इव चन्द्रः अभ्युदयते।

**सुधा**—क्रमाविति। नवकमलकन्दाङ्कुररुचः—नवस्य = नूतनस्य, कमलकन्दस्य = कमलमूलस्य अङ्कुरस्य, रुचिः = कान्तिरिव रुचिर्यस्य तस्य। कलाः = कान्त्यः। स्वैरं स्वैरम् = स्वच्छन्दम्। क्रमौ = क्रमगतया। एकद्वित्रिप्रगतिपरिपाटीः = एकद्वित्रिप्रगतिविधीन्। प्रकटयन् = प्रकाशयन्। प्रेयोविरहदहनोद्दीपितदृशाम्—प्रेयसाम् = प्रियतमानाम्, विरहदहनेन = वियोगाग्निना, उद्दीपिताः = आकुलिताः, दृशः = चक्षूंषि यासां तास्तासाम्। पुरन्ध्रीणाम् = नगरसुन्दरीणां कटाक्षेभ्यः, बिभ्यन् = भयं कुर्वन्। निभृत इव = प्रच्छन्न इव। चन्द्रः = इन्दुः। अभ्युदयते = उदयाचलं याति।

**हिन्दी**—नूतन कमलकन्द ( भसीड़े ) के अङ्कुर के समान कान्ति वाली कलाओं को स्वच्छन्दता से क्रमशः एक दो तीन आदि प्रगति परिपाटियों को प्रकट करता हुआ प्रियतमों की विरहाग्नि से व्याकुल दृष्टि वाली सुन्दरियों के कटाक्षों से डरता हुआ, छिपा हुआ चन्द्रमा उदित हो रहा है ॥ १४ ॥

**एतयोरन्तरं सहृदयसंवेद्यमिति तैरेव विचारणीयम्। तस्मात् स्थितमेतत्—न शब्दस्यैव रमणोयताविशिष्टस्य केवलस्य काव्यत्वम्, नाप्यर्थस्येति। तदिदमुक्तम्—**

**सुधा**—एतयोरिति। एतयोः = उभयोः श्लोकयोः। अन्तरम् = मध्यम्। सहृदयसंवेद्यम् = रसिकसंवेद्यम्। इति। तैः = सहृदयैः एव। विचारणीयम् = चिन्तनीयम्। तस्मात् = तर्हि। एतत् = इयम्। स्थितम् = अवस्थितम्। न शब्दस्यैव = नैव वाच्यस्यैव। रमणीयताविशिष्टस्य = रम्यताविशेषस्य। केवलस्य = मात्रस्य। काव्यत्वम् = काव्यता। नापि अर्थस्य = वाचकस्यापि नैव काव्यत्वम्। तत् = तस्मात्। इदम् = एतत्। उक्तम् = कथितम्।



**हिन्दी**—इन दोनों श्लोकों में सहृदय संवेदन शीलता सहृदयों को ही विचारणीय है। इससे यह निश्चित हुआ कि न तो रमणीयता विशिष्ट केवल शब्द का ही काव्यत्व होता है और न केवल अर्थ का ही। ( काव्यत्व शब्द तथा अर्थ दोनों से होता है। ) इसी से यह कहा गया है—

**रूपकादिरलंकारस्तथान्यैर्बहुधोदितः।**
**न कान्तमपि निर्भूषं विभाति वनिताननम् ॥ १५ ॥**

**अन्वयः**—तथा रूपकादिः अलङ्कारः अन्यैः बहुधा उदितः। कान्तम् अपि निर्भूषं वनिताननं न विभाति।

**सुधा**—रूपकादिरिति। तथा = च। रूपकादिः = रूपकप्रभृतिः अलङ्कारः। अन्यैः = अपरैरालङ्कारिकैः। बहुधा = बहुप्रकारम्। उदितः = कथितः। कान्तम् = कान्तियुक्तम् अपि। निर्भूषम् = भूषणरहितम्। वनिताननम् = रमणीमुखम्। न विभाति = नैव शोभते।

**हिन्दी**—रूपक आदि अलङ्कार अन्य अलङ्कारिकों ने बहुत प्रकार के बताये हैं परन्तु कान्ति युक्त होकर भी भूषण रहित होने पर वनिता का मुख शोभित नहीं होता है ॥ १५ ॥

**रूपकादिमलङ्कारं बाह्यमाचक्षते परे।**
**सुपां तिङां च व्युत्पत्तिं वाचां वाञ्छन्त्यलङ्कृतिम् ॥ १६ ॥**

**अन्वयः**—यो रूपकादिम् अलङ्कारं बाह्यम् आचक्षते। वाचाम् अनलङ्कृति सुपां तिङां च व्युत्पत्ति वाञ्छन्ति।

**सुधा**—रूपकादिमिति। परे = अन्ये। रूपकादिम् = रूपकप्रभृतिम्। अलङ्कारम्। बाह्यम् = गौणम्। आचक्षते = कथयन्ति। वाचाम् = काव्यानाम्। अनलङ्कृतिम् = अलङ्कारशून्यताम्। सुपाम् = सुबन्तानाम्। तिङाम् = तिङन्तानाञ्च। व्युत्पत्तिम् = व्याख्याम्। वाञ्छन्ति = अभिलषन्ति।

**हिन्दी**—भामह के पूर्ववर्ती अन्य आलङ्कारिक विद्वान् रूपक आदि अलङ्कार को बाह्य ( गौण ) बताते हैं तथा काव्य की अलङ्कारिता सुप् ( सुबन्त ) और तिङ् ( तिङन्त ) अर्थात् संज्ञापदों और क्रियापदों की व्युत्पत्ति को स्वीकार करते हैं ॥ १६ ॥

**तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशी।**
**शब्दाभिधेयालङ्कारभेदादिष्टं द्वयं तु नः ॥ १७ ॥**

**अन्वयः**—तत् एतत् सौशब्द्यम् आहुः ईदृशी अर्थव्युत्पत्तिः न। नः तु शब्दाभिधेयालङ्कारभेदात् द्वयम् इष्टम्।

**सुधा**—तदिति। तत् = तर्हि। एतत् = इदम्। सौशब्द्यम् = शब्दचमत्कारिताम्। आहुः = प्रोक्तवन्तः। ईदृशी = एतादृशी। अर्थव्युत्पत्तिः = आर्थीव्याख्या नैव भवतीति। नः = अस्माकं तु शब्दाभिधेयालङ्कारभेदात्—शब्दालङ्कारभेदात् अर्थालङ्कारभेदाच्च। द्वयम् = उभयम्। इष्टम् = अभीष्टम्।

हिन्दी—इस कारण ही इस सौशब्द्य ( चमत्कारपूर्ण शब्दालङ्कार ) को उन आलङ्कारिकों ने बताया है। अर्थ की व्युत्पत्ति ऐसी नहीं होती है किन्तु हमें तो शब्द तथा अर्थ के अलंकार-भेद से दोनों ही अभीष्ट है ॥ १७ ॥

**तेन शब्दार्थौ द्वौ सम्मिलितौ काव्यमिति स्थितम् एवमवस्थापिते द्वयोः काव्यत्वे काचिदेकस्य मनाङ्मात्रन्यूनतायां सत्यां काव्यव्यवहारः प्रवर्ततेत्याह—सहिताविति। सहितौ सहितभावेन साहित्येनावस्थितौ।**

सुधा—तेनेति। तेन = तर्हि। शब्दार्थौ = शब्दश्च, अर्थश्च तौ। द्वौ = उभौ। सम्मिलितौ = संयुक्तौ। काव्यं स्थितम् = काव्यरूपं नियतम् इति। एवम् = इत्थम्। द्वयोः = उभयोः। काव्यत्वे = काव्यहेतौ। अवस्थिते. निर्धारिते सति। काचित् = कापि। एकस्य शब्दस्य अर्थस्य वा केवलमेकस्य। मनाङ्मात्रन्यूनतायाम् सत्याम् = स्तोकमात्रमभावे सति काव्यव्यवहारः। प्रवर्त्तते = प्रवर्त्तितो भवति। इति आह = अत एवोक्तम्। सहितौ = शब्दार्थसहितौ। सहितभावेन = संयुक्तभावेन। साहित्येन = साहित्यरूपेण। अवस्थितौ = संस्थितौ।

हिन्दी—इसी से शब्द और अर्थ दोनों का संयुक्त रूप ही काव्य होता है, ऐसा निश्चित हुआ काव्यत्व के शब्द तथा अर्थ दोनों में किसी एक की थोड़ी-सी भी न्यूनता ( कमी ) होने पर भी काव्यव्यवहार प्रवर्त्तित न होने लगे, अत एव 'सहितौ' शब्द कहा गया है। 'सहितौ' अर्थात् शब्द और अर्थ दोनों ही भली प्रकार मिलकर ही स्थित होने पर साहित्य ( काव्य ) होता है।

**ननु च वाच्यवाचकसम्बन्धस्य विद्यमानत्वादेतयोर्न कथंचिदपि साहित्यविरहः, सत्यमेतत्। किन्तु विशिष्टमेवेह साहित्यमभिप्रेतम्। कीदृशम् ?—वक्रताविचित्रगुणालङ्कारसम्पदां परस्परस्पर्धाधिरोहः। तेन—**

सुधा—नन्विति। ननु = यदि च। वाच्यवाचकसम्बन्धस्य = शब्दार्थसम्बन्धस्य। विद्यमानत्वात् = स्थितित्वात्। एतयोः = अनयोः। कथञ्चिदपि = केनापि प्रकारेण। साहित्यविरहः = साहित्याविद्यमानता। न = नैव भवति। एतत् = इदम्। सत्यम् = तथ्यम्। किन्तु इह = अत्र। विशिष्टम् = विशेषप्रकारकम्। एव साहित्यम् = काव्यम्। अभिप्रेतम् = अभीष्टम्। कीदृशम् = कीदृग्विधम् ? वक्रताविचित्रगुणालङ्कारसम्पदाम्—वक्रताभिः विचित्रगुणानाम् अलङ्काराणाञ्च याः सम्पदस्तासाम्। परस्परं स्पर्धाधिरोहः = अन्योन्यं स्पर्धायाः पराकाष्ठा भवतीति।

हिन्दी—यदि वाच्यवाचक सम्बन्ध की विद्यमानता से इन दोनों ( शब्द तथा अर्थ ) में किसी प्रकार का भी साहित्य वियोग हो ? यह सत्य है किन्तु यहाँ विशिष्ट ही साहित्य वाञ्छित है। कैसा साहित्य अभीष्ट है ? जिसमें सभी प्रकार की वक्रताओं से विचित्र प्रकार के गुणों और अलङ्कारों की सम्पत्ति की परस्पर स्पर्धा की पराकाष्ठा होती है। ऐसा साहित्य अभीष्ट है। अत एव—



**समसर्वगुणौ सन्तौ सुहृदाविव सङ्गतौ।**
**परस्परस्य शोभायै शब्दार्थौ भवतो यथा ॥ १८ ॥**

अन्वयः—समसर्वगुणौ सन्तौ सुहृदौ इव सङ्गतौ शब्दर्थौ परस्परस्य शोभायै यथा भवतः।

सुधा—समेति। समसर्वगुणौ—समाः = समानाः, अन्यूनाः सर्वगुणाः यत्र तथाविधौ सन्तौ। सुहृदौ = मित्रे। इव = यथा। सङ्गतौ = सम्मिलितौ। शब्दार्थौ = वाच्यवाचकौ। परस्परस्य = अन्योन्यस्य। शोभायै = शोभानिमित्तम्। यथा = येन प्रकारेण। भवतः = स्तः।

हिन्दी—समान समस्त गुणों से युक्त दो मित्रों की भाँति मिले हुए शब्द तथा अर्थ परस्पर शोभा के लिए बन जाते हैं ॥ १८ ॥

**ततोऽरुणपरिस्पन्दमन्दीकृतवपुः शशी।**
**दध्रे कामपरिक्षामकामिनीगण्डपाण्डुताम् ॥ १९ ॥**

अन्वयः—ततः अरुणपरिस्पन्दमन्दीकृतवपुः शशी कामपरिक्षामकामिनीगण्डपाण्डुतां दध्रे।

सुधा—तत इति। ततः = तदन्तरम्। अरुणपरिस्पन्दमन्दीकृतवपुः—अरुणस्य = रक्तिमायाः परिस्पन्देन = सञ्चारणेन। मन्दीकृतम् = शिथिलितम्। वपुः = शरीरम् यस्य सः। शशी = चन्द्रः। कामपरिक्षामकामिनीगण्डपाण्डुताम्—कामेन = कन्दर्पेण परिक्षामा = क्षीणा, कामिनी = तस्याः, गण्डयोः = कपोलस्थलयोः या पाण्डुता = पाण्डुरता, ताम्। दध्रे = धृतवान्।

हिन्दी—तदनन्तर प्रातःकाल अरुणिमा के सञ्चरण से मन्दकान्त चन्द्रमा ने काम से परिक्षीण कामिनी के कपोलों जैसी पाण्डुरता धारण की ॥ १९ ॥

**अत्रारुणपरिस्पन्दनमन्दीकृतवपुषः शशिनः कामपरिक्षामवृत्तेः कामिनीकपोलफलकस्य च पाण्डुत्वसाम्यसमर्थनादर्थालङ्कारपरिपोषः शोभातिशयमावहति। वक्ष्यमाणवर्णविन्यासवक्रतालक्षणः शब्दालङ्कारोऽप्यतितरां रमणीयः। वर्णविन्यासविच्छित्तिविहिता लावण्यगुणसंपदस्त्येव।**

सुधा—अत्रेति। अत्र = अस्मिन् श्लोके। अरुणपरिस्पन्दीकृतवपुषः—अरुणसञ्चरणमन्दकान्तशरीरस्य। शशिनः = चन्द्रस्य। कामपरिक्षामवृत्तेः = मदनक्षणिव्यापारस्य कामिनीकपोलफलकस्य = रमणीगण्डस्थलस्य। च पाण्डुत्वसाम्यसमर्थनात् = पाण्डुरतासमानसमर्थनहेतोः। अर्थालङ्कारपरिपोषः = अर्थाङ्कारपरिपुष्टिः। शोभातिशयम् = अत्यधिकशोभाम्। आवहति = धारयति। वक्ष्यमाणवर्णविन्यासवक्रतालक्षणः—वर्णितवर्णविन्यासस्य = अक्षरविन्यासस्य, वक्रता = शोभा लक्षणं यस्य तथाविधः शब्दालङ्कारः अपि। अतितराम् = अत्यन्तम्। रमणीयः = मनोरमः। वर्णविन्यासविच्छित्तिविहिता—अक्षरन्यासशोभासम्पन्नः। लावण्यगुणसम्पदः = सौन्दर्यगुणसम्पत्तिः अस्त्येव।

Scanned with CamScanner

हिन्दी—यहाँ अरुणोदय के संचरण से मन्दकान्त-चन्द्रमा की और मदन के कारण परिक्षीण व्यापार वाले कामिनी की गण्डस्थलों की पाण्डुरता की साम्यता के समर्थन से अर्थालङ्कार की पुष्टि अत्यधिक शोभा धारण करती है। वर्णित वर्ण-विन्यास की शोभा वाला शब्दालङ्कार भी अत्यन्त रमणीय है। वर्णविन्यास की शोभा से सम्पन्न लावण्य-गुण सम्पत्ति तो है ही।

**यथा च—**

**लीलाइ कुवलअं कुवलअं व सीसे समुव्वहंतेण।**
**सेसेण सेसपुरिसाणं पुरिसआरो समुप्पसिओ॥ २०॥**

[ लीलया कुवलयं कुवलयमिव शीर्षे समुद्वहता।
शेषेण शेषपुरुषाणां पुरुषकारः समुपहसितः॥ ]

**अन्वयः**—कुवलयम् इव कुवलयं लीलया शीर्षे ससुद्वहता शेषेण शेषपुरुषाणां पुरुषकारः समुत्पन्नः।

**सुधा—लीलयेति।** कुवलयम् इव = कमलसदृशम्। कुवलयम्—कोः = पृथिव्याः वलयम् = मण्डलम्। लीलया = क्रीडया। शीर्षे = शिरसि। समुद्वहता = धारयता। शेषेण = शेषनागेन। शेषपुरुषाणाम् = अन्यसमस्तजनानाम्, नागानाञ्च। पुरुषकारः = पौरुषम्। समुपहसितः = उपहासतां नीतः।

**हिन्दी**—कमल सदृश भूमण्डल को सरलतया शिर पर धारण करते हुए शेषनाग ने शेष समस्त नागों तथा पुरुषों के पौरुष की मखौल उड़ाई॥ २०॥

**अत्राप्रस्तुतप्रशंसोपमालक्षणवाच्यालङ्कारवैचित्र्यविहिता हेलामात्रविरचितयमकानुप्रासहारिणी समर्पकत्वसुभगा कापि काव्यच्छाया सहृदयहृदयमाह्लादयति।**

**सुधा—अत्रेति।** अत्र = अस्मिन् पद्ये। अस्तुतप्रशंसोपमालक्षणवाच्यालङ्कारवैचित्र्यविहिता—अप्रस्तुतप्रशंसायाः उपमारूपार्थालङ्काराणां च वैचित्र्येण = विचित्रतया विहिता = कृता समुत्पन्ना वा। हेलामात्रविरचितयमकानुप्रासहारिणी—हेलामात्रेण = लीलयैव, विरचिता = रचिता, यमकानुप्रासमनोरमा। समर्पकत्वसुभागा = अर्थसरला। कापि=काचित् अनिर्वचनीया। काव्यच्छाया = काव्यशोभा। सहृदयहृदयम् = सरसचित्तम्। आह्लादयति = आनन्दयति।

**हिन्दी**—यहाँ अप्रस्तुत प्रशंसा, उपमा आदि अर्थालङ्कारों की विचित्रता से उत्पन्न तथा लीलामात्र (विनापरिश्रम) से विरचितयमक-अनुप्रासादि शब्दालङ्कारों से मनोरम सरलता से अर्थ स्पष्ट हो जाने के कारण सुन्दर अनिर्वचनीय काव्यशोभा रसिकजनों के हृदयों को आह्लादित करती है।

**द्विवचनेनात्र वाच्यवाचकजातिद्वित्वमभिधीयते। व्यक्तिद्वित्वाभिधाने पुनरेकपदव्यवस्थितयोरपि काव्यत्वं स्यादित्याह—बन्धे व्यवस्थितौ। बन्धो**



**वाक्यविन्यासः तत्र व्यवस्थितो विशेषेण लावण्यादिगुणालङ्कारशोभिना संनिवेशेत कृतावस्थानौ। सहिताविंत्यत्रापि यथायुक्ति स्वजातीयापेक्षया शब्दस्य शब्दान्तरेण वाच्यस्य वाच्यान्तरेण च साहित्यं परस्परस्पर्धित्वलक्षणमेव विवक्षितम्। अन्यथा तद्विदाह्लादकारित्वहानिः प्रसज्येत।**

**सुधा—अत्रेति।** अत्र = अस्मिन् स्थले। द्विवचनेन 'शब्दार्थौ' इत्यत्रद्विवचनप्रयोगेण। वाच्यवाचकजातिद्वित्वम् = शब्दार्थजातिद्वित्वम्। अभिधीयते = कथ्यते। व्यक्तिद्वित्वाभिधाने व्यक्तिगतद्वित्वकथने पुनः एकपदव्यवस्थियोः = एकपदस्थितयोः अपि। काव्यत्वम् = साहित्यम्, स्यात्। इत्याह = इति कथितम्। बन्धे = रचनायाम्। व्यवस्थितौ वैशिष्ट्येन स्थितौ शब्दार्थौ। बन्धः = रचना वाक्यविन्यासः। तत्र = वाक्यविन्यासे व्यवस्थितः। विशेषेण=विशिष्टतया। लावण्यादिगुणालङ्कारशोभिना=लावण्यादिगुणधर्मिणा। सन्निवेशेत। कृतावस्थानौ = विहितावस्थायाम्। 'सहितौ' इत्यत्रापि = अस्मिन् शब्देऽपि। यथायुक्ति = युक्त्यनुसारम्। स्वजातीयापेक्षया=शब्दापेक्षया। शब्दस्य = वाच्यस्य। शब्दान्तरेण = अन्यशब्देन। वाच्यस्य = शब्दस्य। वाच्यान्तरेण = अन्यवाच्येन च। साहित्यम् = काव्यम्। परस्परस्पर्धित्वलक्षणम् एव = अन्योन्यस्पर्धितारूपमेव। विवक्षितम् = कथितम्। अन्यथा तद्विदाह्लादकारित्वहानिः। तद्विदाम् = काव्यमर्मज्ञानाम् आह्लादकारित्वहानिः = आनन्ददायित्वहानिः। प्रसज्येत् = भवेत्।

**हिन्दी**—यहाँ द्विवचन से वाच्य-वाचक का जातिगत द्वित्व कहा गया है। व्यक्तिगत द्वित्व कहने पर पुनः एक पद में भी व्यवस्थित शब्द तथा अर्थ में भी काव्यत्व होने लगेगा। अतएव "बन्धे व्यवस्थिता" ऐसा कहा गया है। वाक्य की विशेष रचना बन्ध कहलाती है। उसमें व्यवस्थित विशेषरूप से लावण्यादि गुणों तथा अलङ्कारों से शोभित होने वाला रचना द्वारा स्थित। 'सहितौ' यहाँ पर भी यथायुक्ति स्वजातीय अर्थ की अपेक्षा शब्द के शब्दान्तर से और वाच्य के वाच्यान्तर से परस्पर स्पर्द्धा से युक्त लक्षण वाला साहित्य बताना अभीष्ट है। अन्यथा काव्यमर्मज्ञों के आनन्द की हानि होने लगेगी।

**यथा—**

**असारं संसारं परिमुषितरत्नं त्रिभुवनं**
**निरालोकं लोकं मरणशरणं बान्धवजनम्।**
**अदर्पं कन्दर्पं जननयननिर्माणमफलं**
**जगज्जीर्णारण्यं कथमसि विधातुं व्यवसितः॥ २१॥**

**अन्वयः**—संसारम् असारं, त्रिभुवनं परिमुषितरत्नं, लोकं निरालोकं, बान्धवजनं मरणशरणं, कन्दर्पं अदर्पम्, जननयननिर्माणम् अफलं, जगत् जीर्णारण्यं विधातुं कथं व्यवसितः असि।

**सुधा—असारमिति।** संसारम् = विश्वम्। असारम् = सारहीनम्। त्रिभुवनम् = त्रिलोकम्। परिमुषितरत्नम्—परिमुषितानि = अपहृतानि रत्नानि यस्य तत्। लोकम् =

संसारम् निरालोकम् = प्रकाशरहितम्। बान्धवजनम् = बन्धुजनम्। मरणशरणम् = मृत्युशीलम्। कन्दर्पम् = मदनम्। अदर्पम् = निरभिमानम्। जननयननिर्माणम् = लोक-नेत्रोत्पादनम्। अफलम् = निष्फलम्। जगत् = लोकम्। जीर्णारण्यम् = शीर्णवनम्। विधातुम् = कर्त्तुम्। कथम् = केन प्रकारेण। व्यवसितः = कृतोद्यमः असि।

**हिन्दी**—मालतीमाधव नाटक में कापालिक को मालती के वध के लिए उद्यत देखकर माधव कहता है—

इस मालती के वध से तू संसार को असार, त्रिभुवन को रत्नहीन लोक को प्रकाश-रहित, बान्धव जन को मरणशील, कामदेव को अभिमानशून्य लोगों के नयनों के निर्माण को निष्फल तथा इस जगत् को जीर्ण जंगल सा बना देने को क्यों उद्यत हो रहा है॥ २१॥

**अत्र किल कुत्रचित्प्रबन्धे कश्चित्कापालिकः कामपि कान्तां व्यापादयितुमध्यवसितो भवन्नेवमभिधीयते—यदपगतसारः संसारः, हृतरत्नसर्वस्वं त्रैलोक्यम्, आलोककमनीयवस्तुवर्जितो जीवलोकः, सकललोकलोचननिर्माणं निष्फलप्रायम्, त्रिभुवनविजयित्वदर्पहीनः कन्दर्पः, जगज्जीर्णारण्यकल्पमनया विना भवतीति किं त्वमेवंविधमकरणीयं कर्तुं व्यवसित इति।**

**सुधा**—अत्रेति। अत्र = अस्मिन् श्लोके। किल = खलु। कुत्रचित् = क्वापि। प्रबन्धे = महाकाव्ये। कापालिकः = भिक्षुः। कामपि कान्ताम् = रमणीम्। व्यापादयितुम् = हन्तुम्। अध्यवसितः = उद्यतः भवन्। एवम् = इत्थम्। अभिधीयते = कथ्यते। यत् अपगतसारः = निःसारः। संसारः = लोकः। हृतरत्नसर्वस्वं = अपहृतरत्नाखिलम्। त्रैलोक्यम् = त्रिभुवनम्। आलोककमनीयवस्तुवर्जितः = प्रकाशमनोरमवस्तुरहितः। जीवलोकः = संसारः। सकललोकलोचननिर्माणम् = समस्तजननयननिर्माणम्। निष्फलप्रायम् = व्यर्थप्रायम्। त्रिभुवनविजयित्वदर्पहीनः = त्रिलोकजयशीलताभिमानशून्यः। कन्दर्पः = मदनः। जगत् = विश्वम्। जीर्णारण्यकल्पम् = शीर्णकाननसदृशम्। भवतीति किं त्वं कापालिकः एवं विधम् = इत्थम्। अकरणीयम् = अकृत्यम्। कर्तुम् = विधातुम् व्यवसितः = कृतोद्यमः असि इति।

**हिन्दी**—वास्तव में इस श्लोक में किसी प्रबन्ध में कोई कापालिक से किसी रमणी को मारने के लिए उद्यत स्थिति में कहा जा रहा है—तुम इस रमणी को मार कर इस संसार को अपगतसार त्रैलोक्य को हृतरत्नसर्वस्व, जीवलोक को प्रकाश-कमनीय वस्तु से रहित, समस्त लोगों के नयनों के निर्माण को निष्फलप्राय, कन्दर्प को त्रिभुवन विजय वाले अभिमान से शून्य तथा जगत् को जीर्ण जंगल जैसा कर रहे हो। अतः क्या तुम इस प्रकार अकरणीय निन्दनीय कार्य करने के लिए उद्यत हो।

**एतस्मिन् श्लोके महावाक्यकल्पे वाक्यान्तराण्यवान्तरवाक्यसदृशानि तस्याः सकललोकलोभनीयलावण्यसम्पत्प्रतिपादनपराणि परस्परस्पर्धीन्यतिरमणीयान्युपनिबद्धानि कमपि काव्यच्छायातिशयं पुष्णन्ति। मरणशरणं बान्धवजनमिति**



**पुनरेतेषां न कलामात्रमपि स्पर्धितुमर्हतीति न तद्विदाह्लादकारि। बहुषु च रमणीयेष्वेक वाक्योपयोगिषु युगपत् प्रतिभासपदवीमवतरत्सु वाक्यार्थपरिपूरणार्थं तत्प्रतिमं प्राप्तुमपरं प्रयत्नेन प्रतिभा प्रसाद्यते। तथा चास्मिन्नेव प्रस्तुतवस्तु-सब्रह्मचारिवस्त्वन्तरमपि सुप्रापमेव—**

**"विधिमपि विपन्नाद्भुतविधिम्" इति।**

**सुधा**—एतस्मिन्निति। एतस्मिन् श्लोके = अस्मिन् पद्ये। महावाक्यकल्पे = महा-वाक्यसदृशे। वाक्यान्तराणि = अन्यवाक्यानि। अन्तरवाक्यसदृशानि = अपरवाक्य-तुल्यानि। तस्याः = मालत्याः। सकललोकलोभनीयलावण्यसम्पत्प्रतिपादनपराणि—सकललोकैः = समस्तजनैः लोभनीयस्य लावण्यस्य = सौन्दर्यस्य, सम्पदः = सम्पत्तयः प्रतिपादने = समर्थने, पराणि = संलग्नानि। परस्परस्पर्द्धीनि = अन्योन्यस्पर्धीनि अति-रमणीयानि = अतिमनोरमाणि। उपनिबद्धानि = रचितानि। कमपि काव्यच्छायातिशयम् = काव्यशोभातिशयम्। पुष्णन्ति = पोषणं कुर्वन्ति। मरणशरणम्—मरणमेव शरणं यस्य सः, तम् = मृत्युशीलम्। बान्धवजनम् = बान्धवम्। इति पुनः = भूयः। एतेषाम् = अमीषाम्। कलामात्रम् = अंशमात्रम् अपि। स्पर्धितुम् = स्पर्धां कर्त्तुम्। नार्हति = योग्यं नास्ति। अतः तद्विदाह्लादकारि न = काव्यमर्मज्ञानामानन्दकारि नास्ति। बहुषु = बहुलेषु। रमणीयेषु = मनोरमेषु च। एकवाक्योपयोगिषु = एकवाक्याय उपयोगिषु। युगपत् = सहैव। प्रतिभासपदवीम् = आभासत्वम्। अवतरत्सु = प्रकटत्सु। वाक्यार्थपरि-पूरणार्थम् = वाक्यार्थपूर्त्यर्थम्। तत्प्रतिमम् = तद्वाक्यसदृशम्। प्राप्तुम् = लब्धुम्। अपरम् = अन्यम्। प्रयत्नेन = आयासेन। प्रतिभा = भा। प्रसाद्यते = प्रसन्नीक्रियते। तथा च अस्मिन् एव प्रस्तुतवस्तुसब्रह्मचारिवस्त्वन्तरम्—प्रस्तुतवस्तुनः सब्रह्मचारि-वस्तुभिन्न अपि। सुप्रापमेव = सरलतया प्राप्यमेव।

विधिम् = ब्रह्माणम् अपि। विपन्नाद्भुतविधिम् = विनाशाद्भुतविधिम् इति।

**हिन्दी**—इस श्लोक में महाकाव्य सदृश दूसरे वाक्यों जैसे अन्य वाक्य उस मालती के समस्त लोकों द्वारा लोभनीय सौन्दर्य सम्पदा को प्रतिपादन में तत्पर परस्पर स्पर्धा वाले अत्यन्त मनोरम ढंग से उपनिबद्ध होकर किसी अत्यन्त काव्यच्छाया को पुष्ट करते हैं। 'मरणशरणम् बान्धवजनम्' इस प्रकार के वाक्यों को कलामात्र भी स्पर्धा करने योग्य नहीं है। अतः काव्यमर्मज्ञों को आनन्ददायक नहीं है। फिर बहुत से रमणीक एकवाक्योपयोगी वाक्यों के एक साथ मस्तिष्क में उतरने पर वाक्यार्थ को पूर्ण करने के लिए उसी प्रकार के दूसरे वाक्य प्राप्त करने के प्रयत्न से प्रतिभा प्रसन्न हो जाती है और इसमें ही प्रस्तुत वस्तु के सदृश दूसरी वस्तु भी सरलतया प्राप्य है।

"विधिमपि विपन्नाद्भुतविधिम्" अर्थात् ब्रह्मा का भी विपन्न अद्भुत विधान होता है।

**प्रथमप्रतिभातपदार्थप्रतिनिधिपदार्थान्तरासम्भवे सुकुमारतरापूर्वसमर्पणेन कामपि काव्यच्छायामुन्मीलयन्ति कवयः। यथा—**

Scanned with CamScanner

**सुधा—प्रथमेति** । कवयः=कविजनाः । प्रथमप्रतिभातपदार्थप्रतिनिधिपदार्थान्तरासम्भवे—प्रथमम् = सर्वप्रथम प्रतिभातपदार्थस्य = प्रतीतपदार्थस्य प्रतिनिधिस्वरूपे पदार्थान्तरासम्भवे = अन्यपदार्थासम्भवे । सुकुमारतरापूर्वसमर्पणेन—सुकुमारतरस्य = अत्यन्तसुकुमारस्य । पदार्थस्यापूर्वसमर्पणेन = विचित्रप्रकारेण समर्पणेन । कामपि = विचित्राम् । काव्यच्छायाम् = काव्यशोभाम् । उन्मीलयन्ति = प्रकटयन्ति । यथा—

**हिन्दी**—प्रतिभावान् कविजन सर्वप्रथम मस्तिष्क में पदार्थ के प्रतिनिधिरूप में अन्य-पदार्थ के असम्भव होने पर सुकुमारतर पदार्थ के अपूर्व समर्पण के द्वारा अवर्णनीय काव्य शोभा का उन्मीलन करते हैं । यथा—

> **रुद्राद्रेस्तुलनं स्वकण्ठविपिनोच्छेदो हरेर्वासनं ।**
> **कारावेश्मनि पुष्पकापहरणम् ॥ २२ ॥**

**अन्वयः**—रुद्राद्रेः तुलनं स्वकण्ठविपिनोच्छेदः हरेः कारावेश्मनि वासनं पुष्पकापहरणम् ।

**सुधा—रुद्राद्रेरिति** । रुद्राद्रेः = कैलासपर्वतस्य । तुलनम् = उत्तोलनम् । स्वकण्ठविपिनोच्छेदः—स्वकण्ठरूपं यद् विपिनम्, तस्योच्छेदः = विनाशः । हरेः = इन्द्रस्य । कारावेश्मनि = वन्दीगृहे । वासनम् = निवासनम् । पुष्पकापहरणम् = पुष्पकविमानस्यापहरणम् ।

**हिन्दी**—( कविराजशेखर-कृत बालरामायण में ) कैलास पर्वत का रावण द्वारा उठाया जाना अपने कण्ठरूपी अरण्य को काटना, इन्द्र का कारागार में निवास करना, पुष्पक विमान का अपहरण कर लेना ॥ २२ ॥

**इत्युपनिबद्धय पूर्वोपनिबद्धपदार्थानुरूपवस्त्वन्तरासम्भवादपूर्वमेव "यस्येदृशाः केलयः" इति न्यस्तम्, येनान्येऽपि कामपि कमनीयतामनीयन्त । यथा च—**

**सुधा—इतीति** । इति = एवम् । उपनिबद्धय = निर्माय । पूर्वोपनिबद्धपदार्थानुरूपवस्त्वन्तरासम्भवात्—पूर्वनिबद्धस्य पदार्थस्य = प्राग्रचितस्य पदार्थस्याननुरूपवस्तुनः = अनुकूलान्यवस्तुनः अन्तरासम्भवात् । अपूर्वमेव = अद्भुतमेव । 'यस्येदृशाः केलयः' इति न्यस्तम् = उपनिबद्धम् । येन = यस्य प्रयोगेण । अन्येऽपि = अपरेऽपि । कामपि कमनीयताम् = अपूर्वां शोभाम् । अनीयन्त = अप्रापयन् । यथा च—

**हिन्दी**—इस प्रकार रचना कर पूर्वरचित पदार्थानुरूप वस्तु के असम्भव होने से 'यस्येदृशाः केलयः' यह अद्भुत रचना की है जिससे दूसरे भी अवर्णनीय कमनीयता को प्राप्त हो गये हैं । और जैसे—

> **तद्वक्त्रेन्दुविलोकनेन दिवसो नीतः प्रदोषस्तथा**
> **तद्गोष्ठ्यैव निशापि मन्मथकृतोत्साहैस्तदङ्गार्पणैः ।**
> **तां सम्प्रत्यपि मार्गदत्तनयनां द्रष्टुं प्रवृत्तस्य मे**
> **बद्धोत्कण्ठमिदं मनः किम् ॥ २३ ॥**



**अन्वयः**—तथा प्रदोषः तद्गोष्ठ्या एव, निशा अपि मन्मथकृतोत्साहैः तदङ्गार्पणैः तद्वक्त्रेन्दुविलोकनेन दिवसः नीतः । सम्प्रति अपि मार्गदत्तनयनां तां द्रष्टुं प्रवृत्तस्य मे इदं मनः बद्धोत्कण्ठं किम् ।

**सुधा—तेविति** । तथा प्रदोषः = प्रदोषकालः । तद्गोष्ठ्या = तया सह मिलनेनैव निशा = रात्रिः अपि । मन्मथकृतोत्साहैः—मन्मथेन = कन्दर्पेण कृतैः = विहितैः उत्साहैः = उत्कण्ठाभिः । तदङ्गार्पणैः = प्रेयस्यङ्गसमर्पणेन । तद्वक्त्रेन्दुविलोकनेन—तस्याः मुखचन्द्रावलोकनेन । दिवसः = दिवसकालः । नीतः = यापितः । सम्प्रति अपि = इदानीमपि । मार्गदत्तनयनाम्—मार्गे = पथि दत्ते नयने = नेत्रे यया ताम् । ताम् = प्रेयसीम् । द्रष्टुम् = अवलोकयितुम् । प्रवृत्तस्य = संलग्नस्य । इदम् = एतत् । मम = मे । मनः = चित्तम् । बद्धोत्कण्ठम् = उत्कण्ठितं किं भवतीति ।

**हिन्दी**—( तापसवत्सराजचरित में ) प्रदोष काल ( संध्या ) उस प्रेयसी के साथ गोष्ठी करने में, निशा कामदेव द्वारा उत्कण्ठाओं के साथ उसके अङ्गसमर्पण करने से, एवम् उसके मुखचन्द्र का अवलोकन करने से दिवस व्यतीत किया । अब भी मार्ग की ओर टकटकी लगाये उस प्रेयसी को ही देखने के लिए मेरा यह मन उत्कण्ठित हो रहा है ॥ २३ ॥

**इति सम्प्रत्यपि तामेवंविधां वीक्षितुं प्रवृत्तस्य मम मनः किमिति बद्धोत्कण्ठमिति परिसमाप्तेऽपि तथाविधवस्तुविन्यासो विहितः—"अथवा प्रेमासमाप्तोत्सवम्" इति, येन पूर्वेषां जीवितमिवार्पितम् ।**

**सुधा—इतीति** । इति = एवम् । सम्प्रत्यपि = इदानीमपि । ताम् = प्रेयसीम् । एवंविधाम् = ईदृशीम् । वीक्षितुम् = द्रष्टुम् । प्रवृत्तस्य = संलग्नस्य । मम = मे । मनः = चेतः । किमितिबद्धोत्कण्ठम् = किमर्थमुत्कण्ठितम् । इति परिसमाप्ते = शान्ति गते अपि । तथाविधवस्तुविन्यासः = तादृशपदार्थन्यासः । विहितः = कृतः । अथवा प्रेमासमाप्तोत्सवम्—प्रेम्णः = प्रीतेः असमाप्तः = अपूर्णः उत्सवः यत्र तत् । इति येन = येन कारणेन पूर्वेषाम् = पूर्वनिबद्ध वाक्यानाम् । जीवितम् = जीवनम् । अर्पितम् = दत्तम् । इव = यथा स्यात् ।

**हिन्दी**—इस समय भी उस दशा वाली प्रेयसी को देखने को प्रवृत्त मेरा मन न जाने क्यों उत्कण्ठित हो रहा है । अथवा प्रेमोत्सव कभी समाप्त नहीं होता है जिससे पूर्वनिबद्ध वाक्यों में जीवन संचार साकार कर दिया गया है ।

**यद्यपि द्वयोरप्येतयोस्तत्प्राधान्येनैव वाक्योपनिबन्धः, तथापि कविप्रतिभाप्रौढिरेव प्राधान्येनावतिष्ठते । शब्दस्यापि शब्दान्तरेण साहित्यविरहोदाहरणं यथा—**

**सुधा—यद्यपीति** । यद्यपि एतयोः = अनयोः । द्वयोः = उभयोः अपि । तत्प्राधान्येन = साहित्यप्रधानतया एव । वाक्योपनिबन्धः = वाक्यरचना । तथापि कविप्रतिभाप्रौढिः—कवेः = सुरेः प्रतिभायाः = बुद्धेः प्रौढिः = प्रौढतैव । प्राधान्येन = प्रमुखतया । अवतिष्ठते =

वर्तते । शब्दस्यापि = वाच्यस्यापि । शब्दान्तरेण = अन्यशब्देन साहित्यविरहोदाहरणम् = साहित्यवियोगस्योदाहरणमस्ति । यथा—

हिन्दी—यद्यपि इन दोनों श्लोकों में साहित्य की प्रधानता से ही वाक्य निबन्धन किया गया है तथापि कविप्रतिभा की प्रौढता ही प्रधान रूप से बनी रहती है । शब्द के भी शब्दान्तर से साहित्य विरह का उदाहरण, जैसे—

**चारुता वपुरभूषयदासां तामनूननवयौवनयोगः ।**
**तं पुनर्मकरकेतनलक्ष्मीस्तां मदो दयितसङ्गमभूषः ॥ २४ ॥**

अन्वयः—आसां वपुः चारुता ताम् अनूननवयौवनयोगः तं पुनः मकरकेतनलक्ष्मीः तां दयितसङ्गमभूषः मदः अभूषयत ।

**सुधा—चारुतेति** । आसाम् = एतासां कामिनीनाम् । वपुः = शरीरम् । चारुता = सुन्दरता ताम् = सुन्दरताम् । अनूननवयौवनयोगः—अनूनः = सम्पूर्णः, नवयौवनयोगः = नूतनतारुण्ययोगः । तम् = नवयौवनयोगम् । पुनः । मकरकेतनलक्ष्मीः—मकरकेतनस्य = मदनस्य लक्ष्मीः = श्रीः । ताम् = मदनश्रियम् । दयितसंगमभूषः—दयितस्य = प्रियतमस्य संगमभूषः = समागमरूपभूषणम् । मदः, अभूषयत् = अलमकरोत् ।

हिन्दी—इन रमणियों के शरीर को सुन्दरता, सुन्दरता को सम्पूर्णनवयौवन-योग, पुनः उसको मदनश्री और मदनश्री को प्रियतम सम्मिलन-भूषणरूपी मद ने विभूषित किया ॥ २४ ॥

**दयितसङ्गमस्तामभूषयदिति वक्तव्ये कीदृशो मदः, दयितसङ्गमो भूषा यस्येति । दयितसङ्गमशब्दस्य प्राधान्येनाभिमतस्य समासवृत्तावन्तर्भूतत्वाद् गुणीभावो न तद्विदाह्लादकारी । दीपकालङ्कारस्य च काव्यशोभाकारित्वेनोपनिबद्धस्य निर्वहणावसरे त्रुटितप्रायत्वात् प्रक्रमभङ्गविहितं सरसहृदयवैरस्यमनिवार्यम् । 'दयितसङ्गतिरेनम्' इति पाठान्तरं सुलभमेव ।**

**सुधा—दयितेति** । दयितसंगमः = प्रियतमसम्मिलनम् । ताम् = मदनश्रियम् । अभूषयत = अलङ्कृतवान् । इति वक्तव्ये = कथने । कीदृशो मदः = कीदृग्विधः क्षीबः । संगमः = प्रियमिलनम् । भूषा = अलङ्करणं यस्येति । दयितसंगमशब्दस्य = प्रियतममिलनशब्दस्य । प्राधान्येन = प्रमुखतया । अभिमतस्य = वांछितस्य । समासवृत्तौ अन्तर्भूतत्वात् = अदृष्टत्वात् । गुणीभावः = गुणत्वम् । तद्विदाह्लादकारी—तद्विदाम् = काव्यतत्त्वज्ञानाम् । आह्लादकारी = आनन्ददायी । न = नास्ति । दीपकालङ्कारस्य च काव्यशोभाकारित्वेन = वाच्यच्छायाकारितया । उपनिबद्धस्य = रचितस्य । निर्वहणावसरे = निर्वाहकाले । त्रुटितप्रायत्वात् = प्रायः भङ्गत्वेन । प्रक्रमभङ्गविहितम्—प्रक्रमभङ्गदोषजनितम् । सरसहृदयवैरस्यम् = रसिकहृदयनीरसता । आवश्यकम् = अनिवार्यम् । 'दयितसंगतिरेनम्' इति = एवम् । पाठान्तरम् = पाठभेदः । सुलभमेव = सरलमेव ।

**हिन्दी**—"प्रियतम सम्मिलन ने मदनश्री को शोभित किया" इस कथन में कैसा



मद, जिसका दयितसंगम भूषण है ? दयितसंगम शब्द की प्रधानता से अभीष्ट समास वृत्ति में अन्तर्भूत होने के कारण गुणीभाव काव्यतत्त्वज्ञों के लिए आनन्ददायक नहीं है और काव्यशोभा में उपनिबद्ध दीपक अलङ्कार के निर्वहण काल में प्रायः नष्ट हो जाने के कारण प्रक्रमभंगदोषजन्य सरसहृदय में नीरसता आवश्यक है । 'दयितसंगतिरेनम्' यह पाठभेद सुलभ ही है ।

**द्वयोरप्येतयोरुदाहरणयोः प्राधान्येन प्रत्येकमेकतरस्य साहित्यविरहो व्याख्यातः । परमार्थतः पुनरुभयोरप्येकतरस्य साहित्यविरहोऽन्यतरस्यापि पर्यवस्यति । तथा चार्थः समर्थवाचकासद्भावे स्वात्मना स्फुरन्नपि मृतकल्प एवावतिष्ठते । शब्दोऽपि वाक्योपयोगिवाच्यासम्भवे वाच्यान्तरवाचकः सन् वाक्यस्य व्याधिभूतः प्रतिभातीत्यलमतिप्रसङ्गेन ।**

**सुधा—द्वयोरिति** । द्वयोः = उभयोः, अपि । एतयोः = अनयोः उदाहरणयोः । प्राधान्येन = प्रधानतया । प्रत्येकम् एकतरस्य साहित्यविरहः = साहित्याभावः । व्याख्यातः = वर्णितः । परमार्थतः = यथार्थतः । पुनः उभयोः = द्वयोः अपि एकतरस्य । साहित्यविरहः = साहित्याभावः । अन्यतरस्यापि = एकस्यापि । पर्यवस्यति = समाप्तिमेष्यति । तथा च अर्थः, समर्थवाचकासद्भावे = समर्थशब्दस्याभावे । स्वात्मना = स्वतः । स्फुरन् अपि = स्फुरितो भवन्नपि । मृतकल्पः = मृतप्रायः एव । अवतिष्ठते = वर्तते । शब्दः अपि वाक्योपयोगिवाच्यासम्भवे = वाक्याय उपयोग्यर्थाभावे । वाच्यान्तरवाचकः सन् = चमत्कारवाचकः, सन् = चमत्कारहीनार्थः सन् । वाक्यस्य व्याधिभूतः = व्याधिस्वरूपः । प्रतिभाति = प्रतीयते । इति । अलमतिप्रसंगेन = अतिप्रसंगस्यावश्यकतैव नास्ति ।

हिन्दी—इन दोनों श्लोकों ( २१ व २४ ) में प्रधान रूप से प्रत्येक में एक-एक के साहित्याभाव की व्याख्या की गई है । वास्तव में पुनः दोनों उदाहरणों में एक-एक का साहित्याभाव दूसरे का भी पर्यवसान कर देता है । और फिर अर्थ समर्थ शब्द के अभाव में स्वतः स्फुरित होता हुआ भी मृतप्राय ही रहता है । शब्द भी वाक्य के उपयोगी अर्थाभाव में चमत्कारहीन अर्थ होता हुआ वाक्य का व्याधि रूप प्रतीत होता है । अतः इसके विस्तार करने की आवश्यकता ही नहीं है ।

**प्रकृतं तु । कीदृशे बन्धे—वक्रकविव्यापारशालिनि । वक्रो योऽसौ शास्त्रादिप्रसिद्धशब्दार्थोपनिबन्धव्यतिरेकी षट्प्रकारवक्रताविशिष्टः कविव्यापारस्तत्क्रियाक्रमस्तेन शालते श्लाघते यस्तस्मिन् एवमपि कष्टकल्पनोपहतेऽपि प्रसिद्धव्यतिरेकित्वमस्तीत्याह—तद्विदाह्लादकारिणि । तदिति काव्यपरामर्शः तद्विदन्तीति तद्विदस्तज्ज्ञास्तेषामाह्लादमानन्दं करोति यस्तस्मिन् तद्विदाह्लादकारिणि बन्धे व्यवस्थितौ । वक्रतां वक्रताप्रकारांस्तद्विदाह्लादकारित्वं च प्रत्येकं यथावसरमेवोदाहरिष्यन्ते ।**

**सुधा—प्रकृतमिति** । प्रकृतं तु = वास्तविकं तु । कीदृशे बन्धे = कीदृशे प्रबन्धे ? वक्रकविव्यापारशालिनि—प्रसिद्धकविव्यापारविषयके । वक्रः—प्रसिद्धः यः असौ शास्त्रादि-

प्रसिद्धशब्दार्थोपनिबन्धव्यतिरेकी = शास्त्रादौ विख्यातशब्दार्थयोः उपनिबन्धेन व्यतिरेकी। षट्प्रकारवक्रताविशिष्टः = षड्विधप्रसिद्धतयाविशिष्टः। कविव्यापारः = कविकर्म। तत्क्रिया-क्रमः—तस्य काव्यस्य क्रियायाः = रचनायाः क्रमः। तेन शालते = श्लाघ्यते यस्तस्मिन्। एवमपि = इत्थमपि। कष्टकल्पनोपहते = कठिनकल्पनोपनिबद्धे अपि। प्रसिद्धव्यतिरेकित्वम् शास्त्रादौ प्रसिद्धव्यतिरिक्तता अस्तीत्याह—तद्विदाह्लादकारिणि बन्धे व्यवस्थितौ। वक्रतां = वक्रताप्रकारः, तद्विदाह्लादकारित्वम् च प्रत्येकं यथावसरमेव = उचितावसरमेव। उदाहरिष्यन्ते।

**हिन्दी**—मूल बात तो यह है कि कैसे बन्ध में सहभाव युक्त शब्द तथा अर्थ काव्य होते हैं? वक्र कवि के व्यापार से शोभित बन्ध में। वक्र जो शास्त्र प्रसिद्ध शब्द तथा अर्थ के उपनिबन्धन से व्यतिरिक्त (भिन्न) छह प्रकार की वक्रता से विशिष्ट काव्य व्यापार अर्थात् उसका क्रियाक्रम जिससे जो शोभित होता है या प्रशंसित होता है उस बन्ध में इस प्रकार की कठिन कल्पना से उपहत होने पर भी प्रसिद्ध व्यतिरेकित्व आ जाता है। अत एव कहा गया है—"काव्यतत्त्वज्ञों को आह्लादित करने वाले बन्ध में"। 'तद्' इस शब्द से अर्थ है काव्य परामर्श। काव्य परामर्श को जानने वाले तद्विद और उन्हें जो आह्लादित करता है ऐसे आह्लादकारी बन्ध में व्यवस्थित। वक्रता तथा उसके भेदों एवं काव्य मर्मज्ञों की आह्लादकारिता प्रत्येक यथावसर उदाहृत किये जायेंगे।

**एवं काव्यस्य सामान्यलक्षणे विहिते विशेषलक्षणमुपक्रमते। तत्र शब्दार्थयोस्तावत्स्वरूपं निरूपयति—**

**सुधा**—एवमिति। एवम् = इत्थम्। काव्यस्य = साहित्यस्य। सामान्यलक्षणे = साधारणलक्षणे। विहिते = कृते। विशेषलक्षणम् = विशिष्टस्वरूपम्। उपक्रमते = वर्ण्यते। तत्र = तस्मिन्। शब्दार्थयोः = शब्दस्यार्थस्य च। स्वरूपम् = लक्षणम्। निरूपयति = निरूपणं करोति।

**हिन्दी**—इस प्रकार काव्य का सामान्य लक्षण कर लेने के पश्चात् विशेष लक्षण प्रारम्भ किया जाता है। उसमें शब्द तथा अर्थ के स्वरूप का सर्वप्रथम निरूपण किया जा रहा है।

**वाच्योऽर्थो वाचकः शब्दः प्रसिद्धमिति यद्यपि।**
**तथापि काव्यमार्गेऽस्मिन् परमार्थोऽयमेतयोः॥ ८॥**

**अन्वयः**—यद्यपि वाच्यः अर्थः वाचकः शब्द इति प्रसिद्धम्। तथापि अस्मिन् काव्य-मार्गे अयम् एतयोः परमार्थः।

**सुधा—वाच्य इति**। यद्यपि वाच्यः शब्दः अर्थवाचकः, तथा वाचकः शब्दस्य इति प्रसिद्धम् = प्रख्यातम् तथापि। अस्मिन् = एतस्मिन् काव्यमार्गे = कवितावर्त्मनि। अयम् = एषः। एतयोः = शब्दार्थयोः। परमार्थः = अपूर्वार्थः अस्तीति।



**हिन्दी**—यद्यपि वाच्य अर्थ तथा वाचक शब्द होता है, यह प्रसिद्ध है तथापि इस काव्य मार्ग में इन दोनों का परमार्थ है॥ ८॥

**इति एवंविधं वस्तुं प्रसिद्धं प्रतीतम्—यो वाचकः स शब्दः, यो वाच्यश्चाभिधेयः सोऽर्थ इति। ननु च द्योतकव्यञ्जकावपि शब्दौ सम्भवतः, तदसंग्रहान्नाव्याप्तिः, यस्मादर्थप्रतीतिकारित्वसामान्यादुपचारात्तावपि वाचकावेव। एवं द्योत्यव्यङ्ग्ययोरर्थयोः प्रत्येयत्वसामान्यादुपचाराद्वाच्यत्वमेव। तस्माद् वाचकत्वं वाच्यत्वं च शब्दार्थयोर्लोके सुप्रसिद्धं यद्यपि लक्षणम्, तथाप्यस्मिन् अलौकिके काव्यमार्गे कविकर्मवर्त्मनि अयमेतयोर्वक्ष्यमाणलक्षणः परमार्थः किमप्यपूर्वं तत्त्वमित्यर्थः। कीदृशमित्याह—**

**सुधा**—इति एवं विधम् = एतत्प्रकारम्। वस्तु। प्रसिद्धम् = विख्यातम्। प्रतीतम् = ज्ञातम् यः वाचकः सः शब्दः। यश्च वाच्याभिधः = वाच्यनामकः। सः अर्थः भवतीति। ननु च द्योतकव्यञ्जकौ अपि—द्योतकः व्यञ्जकश्चादिशब्दौ सम्भवतः। तदसंग्रहात् = द्योतकव्यञ्जकाग्रहणात्। न अव्याप्तिः = अव्याप्तिदोषः नास्ति। यस्मात् = यतः। अर्थ-प्रतीतिकारित्वसामान्यात् = अर्थप्रतीतिकारितासाधारण्यात् उपचारात् द्योतकव्यञ्जकौ अपि। वाचकौ एव। एवम् = इत्थम्। द्योत्यव्यङ्ग्ययोः = अर्थयोः। प्रत्येयत्वसामान्यात् = ज्ञेयतासाधारण्यात्। उपचारात् वाच्यत्वम् एव भवेत्। तस्मात् = तर्हि। वाचकत्वं वाच्यत्वं च शब्दार्थयोः = शब्दे अर्थे च लोके = जगति। प्रसिद्धम् = विख्यातम्। यद्यपि लक्षणम् = स्वरूपम्। तथापि अस्मिन् = एतस्मिन्। अलौकिके = अद्भुते। काव्यमार्गे = कवितावर्त्मनि अयम् एतयोः वक्ष्यमाणलक्षणः परमार्थः किमपि अपूर्वम् = अलौकिकम् तत्वम् इत्यर्थः। कीदृशम् = तत्वस्वरूपं कीदृशमिति आह—

**हिन्दी**—इस प्रकार की वस्तु लोकप्रसिद्ध प्रतीति है—जो वाचक है वही शब्द तथा वाच्यनामक अर्थ होता है यदि द्योतक तथा व्यञ्जक भी शब्द हो सकते हैं पर द्योतक तथा व्यञ्जकों के ग्रहण न करने पर अव्याप्ति दोष नहीं है क्योंकि अर्थ प्रतीतिकारिता के सामान्य उपचार से भी द्योतक तथा व्यञ्जक दोनों शब्द ही हैं। इस प्रकार द्योत्य तथा व्यङ्ग्य अर्थों में भी प्रत्येयत्व सामान्य के कारण उपचार से वे दोनों वाच्यत्व ही हैं। इस कारण वाचकत्व और वाच्यत्व शब्द और अर्थ का संसार में यद्यपि सुप्रसिद्ध लक्षण है तथापि इस अलौकिक काव्यमार्ग या कविकर्म के मार्ग में यह इन दोनों का लक्षण परमार्थ कोई अपूर्वतत्त्व है, यह इसका तात्पर्य हुआ। यह कैसा है, इसे इस प्रकार कहा गया है—

**शब्दो विवक्षितार्थैकवाचकोऽन्येषु सत्स्वपि।**
**अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः॥ ९॥**

**अन्वयः**—विवक्षितार्थैकवाचकः शब्दः अन्येषु सत्सु अपि हृदयहृदयाह्लादकारि-स्वस्पन्दसुन्दरः अर्थः।

**सुधा—शब्द इति ।** विवक्षितार्थैकवाचकः = वक्तुं वर्णयितुमिच्छतः अर्थस्य एकवाचकः शब्दः । अन्येषु = बहुलेषु पर्यायेषु । सत्सु=भवत्सु अपि । सहृदयहृदयाह्लादकारिस्वस्पन्दसुन्दरः—सहृदयस्य = रसिकस्य हृदये = चेतसि आह्लादकारि = आनन्ददायकः यः स्वस्पन्दसुन्दरः = आत्मनः स्पन्देन = स्वभावेन सुन्दरः = कमनीयः अर्थः भवतीति ।

**हिन्दी—**विवक्षित अर्थ का वाचक अन्य पर्यायों में होता हुआ भी एक मात्र शब्द होता है तथा रसिकजनों के हृदय को आनन्दित करने वाला अपने स्वभाव से सुन्दर अर्थ ही होता है ॥ ९ ॥

**स शब्दः काव्ये यस्तत्समुचितसमस्तसामग्रीकः । कीदृक्—विवक्षितार्थैकवाचकः । विवक्षितो योऽसौ वक्तुमिष्टोऽर्थस्तदेकवाचकस्तस्यैकः केवल एव वाचकः । कथम्—अन्येषु सत्स्वपि । अपरेषु तद्वाचकेषु बहुष्वपि विद्यमानेषु । तथा च—**

**सुधा—स इति ।** सः = असौ । शब्दः = वाचकः । काव्ये = कविकर्मणि । यः तत्समुचितसमस्तसामग्रीकः—तस्य काव्यस्य समुचितैः = उपयुक्तैः । समस्तैः = सम्पूर्णैः । सामग्रीभिः युक्तः भवति । विवक्षितः = वर्णितस्यार्थस्य एकवाचकः कीदृक् भवति ? विवक्षितः यः असौ सः वक्तुम् = कथयितुम् । इष्टः = अभीष्टः । अर्थः तदेकवाचकः = तस्य शब्दस्य एक एव केवलः वाचकः । कथम् = केन प्रकारेण ? अन्येषु = अपरेषु पर्यायेषु सत्सु अपि । अपरेषु तद्वाचकेषु । बहुषु अपि = बहुलेषु अपि । विद्यमानेषु = वर्तमानेषु । तथा च—

**हिन्दी—**काव्य में शब्द वही है जो उसके लिए समस्त समुचित सामग्री से युक्त हो । शब्द कैसा विवक्षित अर्थ का एक ही वाचक । जो कहने को अभीष्ट है । वही विवक्षित अर्थ है उसका एक वाचक उसका केवल एक ही वाचक होता है । कैसे ? दूसरों के रहने पर भी दूसरे बहुत से अर्थ के वाचकों के विद्यमान होने पर भी विवक्षित अर्थ का प्रकाशक होने वाला शब्द ही काव्य में शब्द होता है । और फिर—

**सामान्यात्मना वक्तुमभिप्रेतो योऽर्थस्तस्य विशेषाभिधायी शब्दः सम्यग् वाचकतां न प्रतिपद्यते । यथा—**

**सुधा—सामान्येति ।** सामान्यात्मना—सामान्येन=साधारणरूपेण । आत्मना = स्वेन । वक्तुम् = कथयितुम् । अभिप्रेतः = अभीष्टः । यः अर्थः वाच्यः । तस्य विशेषाभिधायी—विशिष्टरूपेण अभिधायी = अभिधानकर्त्ता । शब्दः = वाचकः । सम्यक् = समीचीनम् वाचकताम् = शब्दत्वम् । न प्रतिपद्यते = नैव प्राप्यते । यथा—

**हिन्दी—**सामान्यरूप से अपने द्वारा कहे जाने को अभीष्ट जो अर्थ है उसका विशेष अभिधायी शब्द ठीक प्रकार वाचकता को प्राप्त नहीं होता है । यथा—

**कल्लोलवेल्लितदृषत्पुरुषप्रहारैरत्नान्यमूनि मकराकर माऽवमंस्थाः ।**
**किं कौस्तुभेन भवतो विहितो न नाम याच्ञाप्रसारितकरः पुरुषोत्तमोऽपि ॥**



**अन्वयः—**मकराकर ! कल्लोलवेल्लितदृषत्परुषप्रहारैः अमूनि रत्नानि मा अवमंस्याः । किम् कौस्तुभेन पुरुषोत्तमः अपि याच्ञाप्रसारितकरः भवतः नाम न विहितः ।

**सुधा—कल्लोलेति ।** मकराकर !—मकराणामाकरस्तत्सम्बुद्धौ=हे सागर ! कल्लोलवेल्लितदृषत्परुषप्रहारैः—कल्लोलैः = तरङ्गैः वेल्लिता = चपलिताः ये दृषदाम् = नवपाषाणानां पुरुषप्रहारा = कठोराघातास्तैः । अमूनि = एतानि । रत्नानि = मणीन् मा अवमंस्थाः = अपमानं मा कुरु । किम् कौस्तुभेन = कौस्तुभमणिना । पुरुषोत्तमः = भगवान् विष्णुः अपि । याच्ञा प्रसारितकरः—याच्ञायै = भिक्षायै । प्रसारितौ = संतानितौ करौ = हस्तौ येन सः । भवतः = श्रीमतः । नाम = अभिधानम् । न विहित = नैव कृतः ।

**हिन्दी—**हे मकराकर सागर ! अपनी लहरों से चपलित नवपाषाणों के कठोर आघातों से इन रत्नों को अपमानित मत करो । क्या एक कौस्तुभ मणि नामक रत्न द्वारा ही पुरुषोत्तम विष्णु जी भी माँगने के लिए हाथ फैलाने को आपके सामने प्रेरित नहीं किये गये ॥ २५ ॥

**अत्र रत्नसामान्योत्कर्षाभिधानमुपक्रान्तम् । कौस्तुभेनेति रत्नविशेषाभिधायी शब्दस्तद्विशेषोत्कर्षाभिधानमुपसंहरतीति प्रक्रमोपसंहारवैषम्यं न शोभातिशयमावहति । न चैतद्वक्तुं शक्यते—यः कश्चिद्विशेषे गुणग्रामगरिमा विद्यते स सर्वसामान्येऽपि सम्भवत्येवेति । यस्मात्—**

**सुधा—अत्रेति ।** अत्र = अस्मिन् श्लोके । रत्नसामान्योत्कर्षाभिधानम्—रत्नसामान्यस्य = साधारणरत्नस्योत्कर्षस्योत्थानस्याभिधानम्=कथनम् तत् । उपक्रान्तम्=प्रारब्धम् । कौस्तुभेन=कौस्तुभमणिना इति रत्नविशेषाभिधायी=विशेषरत्नवाचकः । शब्दः तद्विशेषोत्कर्षाभिधानम् = रत्नविशेषस्योत्कर्षकथनम् । उपसंहरति = उपसंहारं करोति इति प्रक्रमोपसंहारवैषम्यम् = आरम्भोपसंहारस्य विषमताम् । शोभातिशयम् = अत्यधिकशोभाम् । न आवहति = नैव धारयति । च = तथा । एवत् = इदम् । वक्तुम् = कथयितुम् । न शक्यते—यः कश्चित्–यः कोऽपि । विशेषे=वैशिष्ट्ये । गुणग्रामगरिमा = गुणसमूहगौरवम् । विद्यते = वर्तते । सः = असौ । सर्वसामान्ये = सर्वसाधारणे अपि । सम्भवत्येव = भवत्येव इति । यस्मात् = यतः—

**हिन्दी—**यहाँ सामान्य रत्न के उत्कर्ष का वर्णन प्रारम्भ किया था वहाँ कौस्तुभ नामक रत्न विशेष का वर्णन करने वाला शब्द उसके विशेषोत्कर्ष के अभिधान का उपसंहार करता है और यह कहा नहीं जा सकता है कि जो कोई विशेष में गुण समूह की गरिमा रहती है वह सर्व सामान्य में भी होती रही है । क्योंकि—

**वाजिवारणलोहानां काष्ठपाषाणवाससाम् ।**
**नारीपुरुषतोयानामन्तरं महदन्तरम् ॥ २६ ॥**

**अन्वयः—**वाजिवारणलोहानां कष्ठपाषाणवाससां नारीपुरुषतोयानाम् अन्वरं महदन्तरं ( भवति ) ।

Scanned with CamScanner

सुधा—वाजीति। वाजिवारणलोहानाम्—वाजिनः=अश्वस्य, वारणस्य=गजस्य, लोहस्य=अयसश्च, तेषाम्। काष्ठपाषाणवाससाम्—काष्ठस्य पाषाणस्य वाससश्च तेषाम्=इन्धनप्रस्तरवस्त्राणाम्। नारीपुरुषतोयानाम्—नार्यः पुरुषस्य तोयस्य च तेषाम्=स्त्रीपुरुषजलानाम्। अन्तरम्=भेदः, स्वजातिभिन्नता। महदन्तरम्=अतिभिन्नता भवतीति।

हिन्दी—घोड़ा हाथी तथा लोहा, काष्ठ पत्थर तथा वस्त्र एवम् नारी पुरुष जल का स्वजाति के अन्तर से अत्यधिक भिन्नता होती है ॥ २६ ॥

**तस्मादेवंविधे विषये सामान्याभिधाय्येव शब्दः सहृदयहृदयहारितां प्रतिपद्यते। तथा चास्मिन् प्रकृते पाठान्तरं सुलभमेव—"एकेन किं न विहिता भवतः स नाम" इति।**

सुधा—तस्मादिति। तस्मात्=तत्कारणात्। एवंविधविषये=एतत्प्रकारके विषये। सामान्याभिधायी=साधारणाभिधानकः एव शब्दः=वाचकः। सहृदयहृदयहारिताम्=रसिकजनाह्लादकारिताम्। प्रतिपद्यते=प्राप्यते। तथा च—अस्मिन् प्रकृते=एतस्मिन् श्लोके। पाठान्तरम्=पाठभेदः। सुलभमेव=सरलमेव। 'एकेन किं न विहितः=कृतः। भवत। स नाम' इति।

हिन्दी—अतः इस प्रकार के विषय में सामान्य अभिधायी शब्द ही रसिक जनों के हृदयों को प्रसन्न कर देता है और इस कल्लोलवेल्लित श्लोक में 'एकेन किं न विहितः भवतः स नाम" यह पाठान्तर सुलभ ही है।

**यत्र विशेषात्मना वस्तु प्रतिपादयितुमभिमतं तत्र विशेषाभिधायकमेवाभिधानं निबध्नन्ति कवयः। यथा—**

सुधा—यत्रेति। यत्र=यस्मिन् श्लोके। विशेषात्मना=विशेषरूपेण। वस्तुप्रतिपादयितुम्=सिद्धयितुम्। अभिमतम्=अभीष्टम्। तत्र विशेषाभिधायकम्=विशिष्टाभिधानकारकम् एव। अभिधानम्=कथनम्। कवयः=सूरयः। निबध्नन्ति=रचयन्ति। यथा—

हिन्दी—जहाँ विशेषात्मक वस्तु प्रतिपादित करना अभीष्ट होता है वहाँ कवि विशेष अभिधायक शब्द का ही निबन्धन करते हैं। यथा—

> **द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः।**
> **कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी ॥ २७ ॥**

अन्वयः—सा कलावतः कान्तिमती कला अस्य लोकस्य नेत्रकौमुदी च त्वं सम्प्रति कपालिनः समागमप्रार्थनया शोचनीयतां द्वयं गतम्।

सुधा—द्वयमिति। सा=असौ। कलावतः—कलायुक्तस्य चन्द्रस्य। कान्तिमती—कान्तियुक्ता कला। अस्य=एतस्य। लोकस्य=संसारस्य। नेत्रकौमुदी=नयनज्योत्स्ना च त्वम्। सम्प्रति=अधुना। कपालिनः—कपालमस्येति कपाली तस्य=शिवस्य। समागमप्रार्थनया—समागमस्य=सम्प्राप्तेः प्रार्थनया=याच्ञया। शोचनीयताम्=शोकम्। द्वयम्=उभयम्। गतम्=प्राप्तम्।



हिन्दी—वह कलावान् चन्द्रमा की कान्तिमती कला तथा इस संसार की नयनज्योत्स्ना तुम उस समय कपाली शिवजी के समागम की प्रार्थना से दोनों ही शोचनीयता को प्राप्त हो गई हो ॥ २७ ॥

**अत्र परमेश्वरवाचकशब्दसहस्रसंभवेऽपि कपालिन इति बीभत्सरसालम्बनविभाववाचकः शब्दो जुगुप्सास्पदत्वेन प्रयुज्यमानः कामपि वाचकवक्रतां विदधाति। 'सम्प्रति' 'द्वयं' चेत्यतीव रमणीयम्—यत् किल पूर्वमेका सैव दुर्व्यसनदूषितत्वेन शोचनीया संजाता, सम्प्रति पुनस्त्वया तस्यास्तथाविधदुरध्यवसायसाहायकमिवारब्धमित्युपहस्यते। 'प्रार्थना'शब्दोऽप्यतितरां रमणीयः, यस्मात् काकतालीययोगेन तत्समागमः कदाचिन्न वाच्यतावहः। प्रार्थना पुनरत्रात्यन्तं कौलीनकलङ्ककारिणी।**

सुधा—अत्रेति। अत्र=अस्मिन् श्लोके। परमेश्वरवाचकशब्दसहस्रसम्भवे=ईश्वरपर्यायिसहस्रशब्दसञ्जाते अपि। 'कपालिनः' इति रसालम्बनविभाववाचकः=बीभत्सरसरूपस्यालम्बनविभाववाचकः, आलम्बनविभावपर्यायवाची शब्दः। जुगुप्सास्पदत्वेन=घृणात्मकत्वेन। प्रयुज्यमानः=प्रयोगगतः। कामपि=विचित्राम्। वाचकवक्रताम्=वाचकसुन्दरताम्। विदधाति=करोति। तथा च। सम्प्रति=इदानीम्। 'द्वयम्' इति अतीव रमणीयम्=अतिमनोरमम्। यत्=यतः। किल=खलु। पूर्वम्=प्राक्। एका सैव=असावेव। दुर्व्यसनदूषितत्वेन=दुर्व्यसनस्य दूषणेन। शोचनीया=शोच्या सञ्जाता=सम्भूता। सम्प्रति=इदानीम् पुनः। त्वया=भवता। तस्याः=एतस्याः। तथाविधदुरध्यवसायसहायकम्=पूर्वोक्तदुःखदोत्साहसहायकम् इव। आरब्धम्=प्रारब्धम्। इति। उपहस्यते=उपहासः क्रियते। 'प्रार्थना' शब्दः अपि। अतितराम्=अत्यन्तम्। रमणीयः=मनोरमः। यस्मात् काकतालीयत्वयोगेन=आकस्मिक संयोगेन। तत्समागमः=तत्सम्प्राप्तिः। कदाचित् वाच्यताम्=अर्थताम्। नैव आवहः=नैवावहणार्हः। प्रार्थना पुनः अत्र=अस्मिन् स्थाने। अत्यन्तम्=अत्यधिकम्। कौलीनकलङ्ककारिणी—कौलीने=अभिजातकुले कलङ्कारिणी=कलङ्कोत्पादिनी।

हिन्दी—यहाँ परमेश्वरवाचक सहस्रों शब्द होने पर भी 'कपालिनः' यह बीभत्सरस रस के आलम्बनविभाव का वाचक शब्द जुगुप्सास्पदत्व होने के कारण प्रयुक्त होकर किसी अद्भुत वक्रता को धारण करता है। 'सम्प्रति' तथा 'द्वयम्' यह अतीव रमणीय है जो कि वास्तव में पहले तो एक वही चन्द्रकला दुर्व्यसन के दूषित होने से शोचनीय बन गई है और अब पुनः तुमने उस प्रकार के दुरध्यवसाय (दुःखदायी उत्साह) के सहायक जैसा करना आरम्भ कर दिया है। यह भिक्षुक वेषधारी शिवजी द्वारा पार्वती का उपहास किया जा रहा है। 'प्रार्थना' शब्द भी अत्यन्त मनोरम है जिसने काक-

Scanned with CamScanner

वालीय योग ( संयोग से प्राप्ति ) से उसका समागम कदाचित् वाच्यता का वहन न करता। पुनः यह प्रार्थना अत्यन्त ही उच्च कुल में उत्पन्न होने वाली कलङ्ककारिणी है।

**'सा च' 'त्वं च' इति द्वयोरप्यनुभूयमानपरस्परस्पर्धिलावण्यातिशयप्रतिपादनपरत्वेनोपात्तम्। 'कलावतः' 'कान्तिमती' इति च मत्वर्थीयप्रत्ययेन द्वयोरपि प्रशंसा प्रतीयत इत्येतेषां प्रत्येकं कश्चिदप्यर्थः शब्दान्तराभिधेयतां नोत्सहते। कविविवक्षितविशेषाभिधानक्षमत्वमेव वाचकत्वलक्षणम्। यस्मात्प्रतिभायां तत्कालोल्लिखितेन केनचित्परिस्पन्देन परिस्फुरन्तः पदार्थाः प्रकृतप्रस्तावसमुचितेन केनचिदुत्कर्षेण वा समाच्छादितस्वभावाः सन्तो विवक्षाविधेयत्वेनाभिधेयतापदवीमवतरन्तस्तथाविधविशेष-प्रतिपादन-समर्थेनाभिधानेनाभिधीयमानाश्चेतनचमत्कारितामापद्यन्ते। यथा—**

**सुधा—सा चेति।** 'सा च' 'त्वं च' इति द्वयोः=उभयोः अपि। अनुभूयमानपरस्परस्पर्धिलावण्यातिशयप्रतिपादनपरत्वेन—अनुभूयमानस्य परस्परस्पर्धिनः=अन्योन्यस्पर्धायुक्तस्य लावण्यस्य=सौन्दर्यस्यातिशयप्रतिपादनपरत्वेन=अत्यन्तसमर्थनहेतुना। उपात्तम्=गृहीतम् 'कलावतः' 'कान्तिमती' इति च मत्वर्थीप्रत्ययेन=अत्र च मतुपार्थकप्रत्ययेन। द्वयोः=उभयोः अपि। प्रशंसा=स्तुतिः। प्रस्तूयते=प्रतीयते। इति एतेषाम्=अमीषाम्। प्रत्येकं कश्चित्=कोऽपि। अर्थः=वाचकः। शब्दान्तराभिधेयताम्=अन्यशब्दाभिधेयत्वम्। नोत्सहते=स्थानं नैव वहति। कविविवक्षितविशेषाभिधानक्षमत्वम्=कविकथयितुमभिप्रेतस्य विशेषस्यार्थस्य कथनसामर्थ्यम् एव। वाचकत्वलक्षणम्=वाचकतारूपम् अस्ति। यस्मात्=यतः। प्रतिभायाम् तत्कालोल्लिखितेन=तत्क्षणरचितेन। केनचित्=केनापि। परिस्पन्देन=सौन्दर्येण। परिस्फुरन्तः=परिस्फुटिताः पदार्थाः। प्रकृतप्रस्तावसमुचितेन=प्रकृतप्रकरणयोग्येन। केनचित्=केनापि। उत्कर्षेण=उत्थानविशेषेण। समाच्छादितस्वभावाः=आच्छन्नप्रकृतयः। सन्तः=भवन्तः। विवक्षाभिधेयत्वेन=वक्तुमिच्छाविधेयतया। अभिधेयतापदवीम्=अभिधेयत्वस्थानम्। अवतरन्तः=प्राप्नुवन्तः। तथाविधविशेषप्रतिपादनसमर्थेन=तत्प्रकारकविशेषार्थप्रतिपादनक्षमेण अभिधीयमानाः=कथ्यमानाः शब्दाः। चेतनचमत्कारिताम्=सहृदयहृदयचमत्कारित्वम् आपद्यन्ते=प्राप्नुवन्ति। यथा—

**हिन्दी**—'सा च' 'त्वं च' इन दोनों पदों से अनुभूयमान परस्पर स्पर्धा वाले लावण्य की अधिकता को प्रतिपादन करने के लिए ग्रहण किये गये हैं। 'कलावतः' और 'कान्तिमती' पदों में मत्वर्थी प्रत्यय होने से दोनों में ही प्रशंसा प्रतीत होती है। अतः इन सभी पदों में प्रत्येक कोई भी अर्थ अन्य शब्द की अभिधेयता को सहन नहीं कर सकता है। कवि के द्वारा विवक्षित विशेष अर्थ प्रकट करने में समर्थ ही वाचकत्व का लक्षण है जिससे प्रतिभा में तत्काल रचना से किसी परिस्फुरण से स्फुरित होते हुऐ पदार्थ प्रकृत प्रकरण के योग्य किसी उत्कर्ष द्वारा समाच्छन्न स्वभाव वाले होते हुए कथन की विधेयता से अभिधेयता को प्राप्त कर उस प्रकार के विशेषार्थ प्रतिपादन में समर्थ शब्द द्वारा अभिधीयमान अर्थ सहृदयजनों के हृदयों में चमत्कारिता उत्पन्न करने लगते हैं। यथा—



**संरम्भः करिकीटमेघशकलोद्देशेन सिंहस्य यः**
**सर्वस्यैव स जातिमात्रविहितो हेवाकलेशः किल।**
**इत्याशाद्विरदक्षयाम्बुदघटाबन्धेऽप्यसंरब्धवान्**
**योऽसौ कुत्र चमत्कृतेरतिशयं यात्वम्बिकाकेसरी॥ २८॥**

**अन्वयः**—करिकीटमेघशकलोद्देशेन सिंहस्य यः संरम्भः, सः सर्वस्य एव जातिमात्रविहित। हेवाकलेशः किल यः असौ अम्बिकाकेसरी आशाद्विरदक्षयाम्बुदघटाबन्धे अपि असंरब्धवान् ( सः ) कुत्र चमत्कृतेः अतिशयं यातु।

**सुधा—संरम्भ इति।** करिकीटमेघशकलोद्देशेन—करिकीटरूपं यन्मेघशकलं तदुद्देशेन=गजकीटघनखण्डोद्देशेन। सिंहस्य=मृगराजस्य यः संरम्भः=तिरस्कारः। सः=असौ सर्वस्य=सम्पूर्णस्य एव। जातिमात्रविहितः। मृगराज जातिमात्रकृतः। हेवाकलेशः=स्वभावमात्रम्। किल=खलु। यः असौ=सः। अम्बिकाकेसरी—अम्बिकायाः=दुर्गायाः केसरी=सिंहः। आशाद्विरदक्षयाम्बुदघटाबन्धे—आशाद्विरदरूपिणां=दिग्गजरूपिणाम् क्षयाम्बुदानाम्=प्रलयमेघानाम् घटाबन्धे=घटारचनाकाले अपि। असंरब्धवान्=अभिनिवेशहीनः ( सः ) कुत्र=क्व। चमत्कृतेः=चमत्कारस्य। अतिशयम्=अत्यधिकम्। यातु=गच्छतु।

**हिन्दी**—करिकीट रूपी मेघखण्ड के बहाने से जो सिंह का तिरस्कार है वह वास्तव में समस्त गज जाति मात्र के लिए कहा गया है। जो वह दुर्गा देवी का वाहन केसरी ( सिंह ) दिग्गज रूपी प्रलय घनों को घटा रचना में भी अभिनिवेशहीन है वह चमत्कार की अधिकता को कहाँ से प्राप्त कर सकता है?॥ २८॥

**अत्र करिणां 'कीट'-व्यपदेशेन तिरस्कारः, तोयदानां च 'शकल'-शब्दाभिधानेनानादरः, 'सर्वस्य' इति यस्य कस्यचित्तुच्छतरप्रायस्येत्यवहेला, जातेश्च 'मात्र'-शब्दविशिष्टत्वेनावलेपः, हेवाकस्य 'लेश'-शब्दाभिधानेनाल्पताप्रतिपत्तिरित्येते विवक्षितार्थैकवाचकत्वं द्योतयन्ति। 'घटाबन्ध'-शब्दस्य प्रस्तुतमहत्त्वप्रतिपादनपरत्वेनोपात्तस्तन्निबन्धनतां प्रतिपद्यते। विशेषाभिधानाकाङ्क्षिणः पुनः पदार्थस्वरूपस्य तत्प्रतिपादनपरविशेषणशून्यतया शोभाहानिरुत्पद्यते। यथा—**

**सुधा—अत्रेति।** अत्र=अस्मिन् श्लोके। करिणां=गजानाम्। कीटव्यपदेशेन=कीटव्याजेन। तिरस्कारः=तिरस्कृतिः। तोयदानाम्=घनानाम् च 'शकल'शब्दाभिधानेन=शकलशब्दकथनेन। अनादरः=तिरस्कारः। 'सर्वस्य' इति यस्य कस्यचित् तुच्छतरप्रायस्य=प्रायोऽत्यधिकतुच्छस्य। इति अवहेला=अनादरः। जातेश्च 'मात्र'-शब्दविशिष्टत्वेन=मात्रशब्दविशेषतया। अवलेपः=गर्वः। हेवाकस्य=स्वभावस्य। 'लेश'शब्दाभिधानेन=लेशशब्दसंज्ञया। अल्पताप्रतिपत्तिः—अल्पतायाः=तुच्छतायाः प्रतिपत्तिः=प्रतीतिः इति। एते=इमे। विवक्षितार्थैकवाचकत्वम्=वक्तुमिष्टस्यार्थस्य केवलं वाचकत्वम्। द्योतयन्ति=प्रकटयन्ति। 'घटाबन्ध' शब्दस्य प्रस्तुतमहत्त्वप्रतिपादनपरत्वेन=प्रस्तुतस्या-

Scanned with CamScanner

म्बिकाकेसरिणः महत्त्वस्य प्रतिपादनपरत्वेन = समर्थनपरत्वेन उपात्तः = गृहीतः। तन्निबन्धनताम् = महत्त्वप्राप्तिकारणताम्। प्रतिपद्यते = क्रियते। विशेषाभिधानाकांक्षिणः = विशिष्टाभिधानाभिलाषिणः। पुनः पदार्थस्वरूपस्य। तत् प्रतिपादनपरविशेषणशून्यतया = विशेषाभिधानसमर्थनयुक्तविशेषणशून्यतया। शोभाहानिः = सौन्दर्यहानिः। उत्पद्यते = जायते। यथा—

**हिन्दी**—यहाँ हाथियों का कीट के बहाने से तिरस्कार किया गया है तथा बादलों का 'शकल' शब्द के अभिधान द्वारा अनादर। 'सर्वस्य' इस पद से जिस किसी अत्यन्त तुच्छप्राय की अवहेलना और जाति का 'मात्र' शब्दाभिधान से अभिमान 'हेवाकलेश' शब्दाभिधान से अल्पता की प्रतीति, यह सभी शब्द विवक्षितार्थं केवल वाचकत्व को प्रकट करते हैं। घटबन्ध शब्द के अम्बिकाकेसरी के महत्व का प्रतिपादन करने के कारण ग्रहण किये गये महत्त्व की निबन्धनता को प्राप्त करता है फिर विशेषाभिधान के अभिलाषी पदार्थ के स्वरूप का विशेषाभिधान समर्थन युक्त विशेषण की शून्यता से शोभाहानि उत्पन्न होती है। यथा—

**तत्रानुल्लिखिताख्यमेव निखिलं निर्माणमेतद्विधे-**
**रुत्कर्षप्रतियोगिकल्पनमपि न्यक्कारकोटिः परा।**
**याताः प्राणभृता मनोरथगतीरुल्लङ्घ्य यत्संपद-**
**स्तस्याभासमणीकृताश्मसु मणेरश्मत्वमेवोचितम् ॥ २९ ॥**

**अन्वयः**—तत्र विधेः एवत् निखिलं निर्माणम् अनुल्लिखिताख्यम् एव उत्कर्षप्रतियोगिकल्पनम् अपि परा न्यक्कारकोटिः, यत्सम्पदः प्राणिभृतां मनोरथगतीः उल्लङ्घ्य याताः तस्य आभासमणीकृताश्मसु मणेः अश्मत्वम् एव उचितम्।

**सुधा**—तत्रेति। तत्र = चिन्तामणौ। विधेः = ब्रह्मणः। एवत् = इदम्। निखिलम् = अखिलम्। निर्माणम् = संरचनम्। अनुल्लिखितम् एव = नामोल्लेखमनर्हमेव। उत्कर्षप्रतियोगिकल्पनम्—उत्कर्षस्य = उत्कर्षणशीलपदार्थस्य प्रतियोगिनः = प्रतिस्पर्धिनः कल्पनम् = कल्पनाकरणम् अपि। परा = महती। न्यक्कारकोटिः = अपमानपराकाष्ठा अस्ति। यत्सम्पदः = यस्य संपत्तिः, प्राणिभृताम् = जीवधारिणाम्। मनोरथगतीः = कामनागतीः। उल्लंघ्य = पारं कृत्वा। याताः = प्रयाताः। तस्य = चिन्तामणेः। आभासमणीकृताश्मसु—आभासेन कृतेषु = विहितेषु अश्मसु = प्रस्तरखण्डेषु मणेः = मणिरत्नस्य प्रस्तरस्य। अश्मत्वम् = पाषाणत्वम् एव उचितम् = उपयुक्तम्।

**हिन्दी**—जिस चिन्तामणि के होने पर विधाता की यह समस्त रचना ही सृष्टि का नामोल्लेख करने योग्य नहीं रह जाती है। उत्कर्ष वाले पदार्थ की प्रतिस्पर्धा की कल्पना की महती अपमान की पराकाष्ठा है तथा जिसकी सम्पदा प्राणिधारियों की मनोरथगतियों का उल्लङ्घन कर चली गयी। उस चिन्तामणि के आभास से मणि रूप हो जाने वाले प्रस्तरखण्डों में साधारण मणि का पाषाणत्व ही उचित है ॥ २९ ॥



**अत्र 'आभास'शब्दः स्वयमेव मात्रादिविशिष्टत्वमभिलषंल्लक्ष्यते। पाठान्तरम्—'छायामात्रमणीकृताश्मसु मणेस्तस्याश्मतैवोचिता' इति। एतच्च वाचकवक्रताप्रकारस्वरूपनिरूपणावसरे प्रतिपदं प्रकटीभविष्यतीत्यलमतिप्रसङ्गेन।**

**सुधा**—अत्रेति। अत्र=अस्मिन् श्लोके। 'आभास'शब्दः स्वयमेव=आत्मनैव। मात्रादिविशिष्टत्वम् = मात्रादिवैशिष्ट्यम्। अभिलषन् = वाञ्छन्। लक्ष्यते = दृश्यते। पाठान्तरम्—"छायामात्रमणीकृताश्मसु मणेस्तस्याश्मतैवोचिता" इति छायामात्रेण कृताश्मसु = कृतपाषाणखण्डेषु मणेः = मणिप्रस्तरस्य। तस्य अश्मत्वम् = पाषाणत्वम् एव। उचिता = उपयुक्ता। इति एतच्च = इदञ्च। वाचकवक्रताप्रकारस्वरूपनिरूपणावसरे—वाचकवक्रतायाः = शब्दवक्रतायाः प्रकारस्य = भेदस्य स्वरूपस्य = लक्षणस्य निरूपणावसरे = अवलोकनकाले। प्रतिपदम् = पदे पदे। प्रकटीभविष्यति। इति अतः अतिप्रसङ्गेन = महद्विवेचनेन। अलम्।

**हिन्दी**—यहाँ 'आभास' शब्द स्वयमेव मात्रादिविशिष्टताओं की इच्छा करता हुआ दिखाई पड़ता है। उसका पाठान्तर छायामात्रमणीकृताश्मसु मणेस्तस्याश्मतैवोचिता"। इस पद में छायामात्र से पत्थर को मणि बना देने वाले चिन्तामणि प्रस्तर का पत्थर होना ही उचित है और यह शब्द-वक्रता के प्रकारों के स्वरूप-निरूपण के अवसर पर पद-पद पर स्वयं प्रकट हो जायेगा। अतः अधिक विवेचन करने की आवश्यकता नहीं है।

**अर्थश्च वाच्यलक्षणः कीदृशः—काव्ये यः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः। सहृदयाः काव्यार्थविदस्तेषामाह्लादमानन्दं करोति यस्तेन स्वस्पन्देनात्मीयेन स्वभावेन सुन्दरः सुकुमारः। तदेतदुक्तं भवति—यद्यपि पदार्थस्य नानाविधधर्मखचितत्वं संभवति तथापि तथाविधेन धर्मेण सम्बन्धः समाख्यायते यः सहृदयहृदयाह्लादमाधातुं क्षमते। तस्य च तदाह्लादसामर्थ्यं संभाव्यते येन काचिदेव स्वभावमहत्ता रसपरिपोषाङ्गत्वं वा व्यक्तिमासादयति। यथा—**

**सुधा**—अर्थ इति। वाच्यलक्षणः = वाच्यस्वरूपः। अर्थः कीदृशः = कीदृग्विधः? काव्ये = काव्यबन्धे। यः सहृदयाह्लादकारिस्वस्पन्द सुन्दरः—सहृदयानाम् = सज्जनानाम् हृदयाह्लादकारि = चित्तानन्ददायकम् स्वस्पन्देन = निजस्वभावेन सुन्दरः = शोभनश्च। सहृदयाः = सहृदयजनाः। काव्यार्थविदः = काव्यमर्मज्ञाः। तेषां = तथाविधानाम्। आह्लादम् = आनन्दम् करोति योऽर्थस्तेन = तद् हेतुना। स्वस्पन्देन = निजस्वभावेन। सुन्दरः = शोभनः सुकुमारः तत् = तस्मात्। एवत् = इदम् उक्तम् भवति—यद्यपि पदार्थस्य = वस्तुनः। नानाविधधर्मखचितम् = विविधधर्मयुक्तत्वं सम्भवति तथापि तद्विधेन = तत्प्रकारेण धर्मेण सम्बन्धः समाख्यायते = सम्यग्वर्ण्यते। यः सहृदयाह्लादम् = सज्जनानन्दम् आधातुम् = धारयितुम् उत्पादयितुं वा। क्षमते = समर्थो भवति। तस्य = तत्पदार्थस्य च तदाह्लादसामर्थ्यम् = सहृदयानन्दसमर्थता सम्भाव्यते। येन =

येन कारणेन । काचिदेव = काप्येव । स्वभावमहत्ता = प्रकृतिमहत्ता । रसपरिपोषाङ्गत्वम् = रसपरिपुष्टता । व्यक्तिम् = अभिव्यक्तिम् । आसादयति = प्रापयति । यथा—

**हिन्दी**—वाच्यलक्षणात्मक अर्थ कैसा हो ? काव्य में जो सहृदयजनों को आनन्द-दायक अपने स्वभाव से सुन्दर हो। सहृदयकाव्यार्थ के ज्ञाता होते हैं उनको जो आनन्दित कर देता है इससे अपने स्वभाव से वह सुन्दर सुकुमार होता है । अतः यह कहा जाता है—यद्यपि पदार्थ का अनेक प्रकार के धर्मों से युक्त होना सम्भव है फिर भी इस प्रकार के धर्म से सम्बन्ध भली प्रकार वर्णन किया जाता है जो सहृदयजनों को आनन्दित करने में समर्थ है और इस पदार्थ का सहृदयों के आनन्द का सामर्थ्य सम्भव हो जाता है जिससे कोई भी स्वभाव की महत्ता रस के परिपोषकत्व को व्यक्त हो जाती है । यथा—

**दंष्ट्रापिष्टेषु सद्यः शिखरिषु न कृतः स्कन्धकण्डूविनोदः**
**सिन्धुष्वङ्गावगाहः खुरकुहरगलत्तुच्छतोयेषु नाप्तः ।**
**लब्धाः पातालपङ्के न लुठनरतयः पोत्रमात्रोपयुक्ते**
**येनोद्धारे धरित्र्याः स जयति विभुताविघ्नितेच्छो वराहः ॥ ३० ॥**

**अन्वयः**—येन धरित्र्याः उद्धारे दंष्ट्रापिष्टेषु शिखरिषु स्कन्धकण्डूविनोदः न कृतः खुरकुहरगलत्तुच्छतोयेषु सिन्धुषु अङ्गावगाहः न आप्तः, पोत्रमात्रोपयुक्ते पातालपङ्के लुठनरतयः न लब्धाः, सः विभुताविघ्नितेच्छः वराहः जयति ।

**सुधा**—दंष्ट्रेति । येन वराहावतारिणा भगवता विष्णुना । धरित्र्याः = पृथिव्याः । उद्धारे = उद्धरणकाले । दंष्ट्रापिष्टेषु—दंष्ट्राभिः पिष्टेषु = चूर्णीभूतेषु । शिखरेषु = पर्वतेषु स्कन्धकण्डूविनोदः—स्कन्धाभ्याम् = अंसाभ्याम् कण्डूविनोदः = घर्षणानन्दः । न कृतः = नैव विहितः । खुरकुहरगलत्तुच्छतोयेषु—खुराणां कुहरैः गलितं तुच्छं तोयं येषां ते तेषु = शफकुहरविगलितस्वल्पजलेषु । सिन्धुषु = सागरेषु । अङ्गावगाहः = स्नानम् । न आप्तः = नैव कृतः । पोत्रमात्रोपयुक्ते = केवलं पोतनार्थम् । उपयुक्ते = अनुकूले । पातालपङ्के = पातालकर्दमे । लुठनरतयः = लुठनानन्दाः । न लब्धाः = नैव प्राप्ताः । सः = तथाविधः । विभुताविघ्नितेच्छः—विभुतया अविघ्निता = अवाधिता, इच्छा = अभिलाषा यस्य सः वराहः = वराहरूपधारी भगवान् विष्णुः । जयति = सर्वोत्कृष्टो भवति ।

**हिन्दी**—जिन वराहावतारी भगवान् विष्णु ने पृथ्वी का उद्धार करते समय अपनी दाढ़ों द्वारा पीसे गये पर्वतों पर कन्धों को रगड़ने का आनन्द नहीं लिया तथा जिन्होंने अपने खुरकुहरों से विगलित होते हुए तुच्छ जलवाले सागरों में स्नान नहीं किया एवं जिन्होंने पोतने मात्र के लिए उपयुक्त पाताल की कीचड़ में लोटने का आनन्द भी प्राप्त नहीं किया, ऐसे बिभुता के कारण बाधित अभिलाषा वाले वराह भगवान् सर्वोत्कृष्ट हैं ॥ ३० ॥

**अत्र च तथाविधः पदार्थपरिस्पन्दमहिमा निबद्धोदयः स्वभावसंभविनस्तत्परिस्पन्दान्तरस्य संरोधसम्पादनेन स्वभावमहत्तां समुल्लासयन् सहृदयाह्लादकारितां प्रपन्नः । यथा च—**



**सुधा**—अत्रेति । अत्र = अस्मिन् श्लोके च । तथाविधः = तादृशः । पदार्थपरिस्पन्द-महिमा—पदार्थस्य = वराहरूपिणो भगवतः विष्णोः परिस्पन्दमहिमा = व्यापार-महत्त्वम् । निबद्धोदयः—निबद्धस्य = वर्णनस्योदयः = प्रस्तुतिरस्ति । स्वभावसम्भावसम्भाविनः = प्रकृत्योत्पन्नस्य तत्परिस्पन्दान्तरस्य = पदार्थव्यापारान्तरस्य । संरोधसम्पादनेन = विरोध-करणेन । स्वभावमहत्ताम् = प्रकृतिमहत्त्वम् । समुल्लासयन् = आह्लादयन् । सहृदया-ह्लादकारिताम् = सज्जनानन्दकारिताम् । प्रपन्नः = सम्पन्नः । यथा च—

**हिन्दी**—इस श्लोक में उस प्रकार वराहरूपी भगवान् विष्णु के व्यापार की महिमा का वर्णन प्रस्तुत किया गया है । स्वभाव से होने वाले उस पदार्थ के व्यापारान्तर के विरोध का सम्पादन करने से स्वभाव की महत्ता को समुल्लासित करते हुए सहृदयों को आनन्दित करता है । यथा—

**तामभ्यगच्छद्रुदितानुसारी मुनिः कुशेध्माहरणाय यातः ।**
**निषादविद्धाण्डजदर्शनोत्थः श्लोकत्वमापद्यत यस्य शोकः ॥ ३१ ॥**

**अन्वयः**—कुशेध्माहरणाय यातः मुनिः रुदितानुसारी ताम् अभ्यगच्छत् । यस्य निषाद विद्धाण्डजदर्शनोत्थः शोकः श्लोकत्वम् आपद्यत ।

**सुधा**—तामिति । कुशेध्माहरणाय = कुशेन्धनानयनार्थम् । यातः = गतः । मुनिः = वाल्मीकिः । रुदितानुसारी = रुदनानुयातः । तां = सीताम् । अभ्यगच्छत् = अभ्याजगाम । यस्य = यन्मुनेः । निषादविद्धाण्डजदर्शनोत्थः—निषादेन = आखेटकेन विद्धस्याण्डजस्य = क्रौञ्चपक्षिणः दर्शनेन = अवलोकनेनोत्थः = संजातः । शोकः = दुःखम् । श्लोकत्वम् = श्लोकरूपताम् । आपद्यत = समभवत् ।

**हिन्दी**—कुश तथा इंधन ( समिधाएँ ) लेने के लिए गये हुए मुनि वाल्मीकि रुदन का अनुसरण करते हुए उसके पास पहुँचे जिसका निषाद के बाण से विंधे क्रौंच पक्षी को देखते ही उत्पन्न हुआ शोक श्लोक बन गया । ( वाल्मीकि रामायण बा० का० २–१५—"मा विषाद प्रतिष्ठां त्वमगमः शाश्वती समाः । यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्" ) ।

**अत्र कोऽसौ मुनिर्वाल्मीकिरिति पर्यायपदमात्रे वक्तव्ये परमकारुणिकस्य निषादनिर्भिन्नशकुनिसंदर्शनमात्रसमुत्थितः शोकः श्लोकत्वमभजत यस्येति तस्य तदवस्थजनकराजपुत्रीदर्शनविवशवृत्तेरन्तःकरणपरिस्पन्दः करुणरसपरिपोषाङ्गतया सहृदयहृदयाह्लादकारी कवेरभिप्रेतः । यथा च—**

**सुधा**—अत्र कोऽसाविति । अत्र = अस्मिन् श्लोके । असौ = सः । मुनिः = ऋषिः । वाल्मीकिः = वाल्मीकिनामा कः आसीदिति । पर्यायपदमात्रे = केवलं पर्यायवाचिपदे । वक्तव्ये = कथने । परमकारुणिकस्य = परमदयालोः । निषादनिर्भिन्नशकुनिसन्दर्शनमात्र-समुत्थितः—निषादेन = भिल्लेन निर्भिन्नस्य = हतस्य शकुनेः = पक्षिणः सन्दर्शनमात्रेण = अवलोकनमात्रेण । समुत्थितः = सञ्जातः । शोकः = दुःखम् । श्लोकत्वम् = श्लोकरूपताम् । अभजत = अजायत । यस्य = यन्मुनेः इति, तस्य । तदवस्थाजनकराजपुत्रीदर्शन-

Scanned with CamScanner

विवशवृत्तेः—तदवस्थायां = शोकाकुलदशायाम्, जनकराजपुत्र्याः = सीतायाः, दर्शनेन= अवलोकनेन विवशवृत्तेः = पराधीनवृत्तेः । अन्तःकरणपरिस्पदः = चेतसो व्यापारः। करुणरसपरिपोषाङ्गतया—करुण रसस्य परिपोषाङ्गतया = परिपोषणतया । सहृदयाह्लाद-कारी = सरसहृदयानन्ददायी । कवेः = वाल्मीकेः । अभिप्रेतः = अभिप्रायः । यथा च—

हिन्दी—इस श्लोक में यह वाल्मीकि मुनि कौन थे, केवल इस पर्याय पद के कहने के स्थान पर परम कारुणिक जिन मुनि का निषाद के द्वारा मारे गये क्रौञ्च पक्षी को देखने मात्र से उत्पन्न हुआ शोक ही श्लोक बन गया। उनकी इस दशा में जनक-राजपुत्री के दर्शन मात्र से विवशवृत्ति वाले अन्तःकरण का व्यापार करुण रस के परिपोषण में अङ्गरूप से सहृदयजनों को आनन्दित करने वाला कवि को अभीष्ट था। यथा—

**भर्तुर्मित्रं प्रियमविधवे विद्धि मामम्बुवाहं**
**तत्संदेशाद्धृदयनिहितादागतं त्वत्समीपम् ।**
**यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानां**
**मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि ॥ ३२ ॥**

**अन्वयः**—हे अविधवे ! अम्बुवाहम् मां भर्तुः प्रियं मित्रं हृदयनिहितात् तत्संदेशात् त्वत्समीपम् आगतं विद्धि । यः पथि श्राम्यतां प्रोषितानाम् अबलावेणिमोक्षोत्सुकानि वृन्दानि मन्द्रस्निग्धैः ध्वनिभिः त्वरयति ।

**सुधा**—भर्तुरिति । हे अविधवे = अयि सौभाग्यवति ! अम्बुवाहम् = मेघम् । माम् । भर्तुः = पत्युः । प्रियं मित्रम् = प्रियसखायम् । हृदयनिहितात् = चेतसि धृतात् । तत्सन्देशात् = पतिसमाचारात् । त्वत्समीपम् = तव सकाशम् । आगतम् = आयातम् । विद्धि = जानीहि । यः अयम् = एषः । पथि = वर्त्मनि । श्राम्यताम् = विश्राम्यताम् । प्रोषितानाम् = प्रवासिनाम् । अबलावेणिमोक्षोत्सुकानि—अबलानाम् = नारीणां वेणिमोक्षाय = कचविमोचनायोत्सुकानि = समुत्साहितानि । वृन्दानि = समूहानि । मन्द्रस्निग्धैः = गम्भीरस्निग्धैः । ध्वनिभिः = रवैः । त्वरयति = शीघ्रतां करोति ।

**हिन्दी**—महाकवि कालिदास के मेघदूत ( पू० मे०–५६ ) में मेघ यक्ष का यक्षिणी के पास संदेश ले जाकर कहता है—

हे अविधवे ! मुझ मेघ को तुम अपने पति का प्रिय मित्र, हृदय में संजोये अपने प्रियतम के सन्देश को लेकर अपने घर से आया हुआ समझ लो। जो कि मार्ग में थके होने के कारण विश्राम कर रहे परदेशी प्रियतमों को अपनी प्रियाओं की चोटियों को खोलने के लिए उत्सुक के समूह को गम्भीर तथा स्निग्ध ध्वनियों से शीघ्रतया जाने को बाध्य कर देता है ॥ ३२ ॥

**अत्र प्रथममामन्त्रणपदार्थस्तदाश्वासकारिपरिस्पन्दनिबन्धनः। भर्तुर्मित्रं मां विद्धीत्युपादेयत्वमात्मनः प्रथयति । तच्च न सामान्यम्, प्रियमिति विश्रम्भकथापात्रताम्। इति तामाश्वास्योन्मुखीकृत्य च तत्संदेशात्त्वत्समीपमागमनमिति**



**प्रकृतं प्रस्तौति । हृदयनिहितादिति स्वहृदयानिहितं सावधानत्वं द्योत्यते । ननु चान्यः कश्चिदेवंविधव्यवहारविदग्धबुद्धिः कथं न नियुक्त इत्याह—ममैवात्र किमपि कौशलं विजृम्भते । अम्बुवाहमित्या मनस्तत्कारिताभिधानं द्योतयति । यः प्रोषितानां वृन्दानि त्वरयति, संजातत्वराणि करोति । कीदृशानाम्—श्राम्यतां त्वरायामसमर्थानामपि । वृन्दानीति बाहुल्यात्तत्कारिताभ्यासं कथयति । केन—मन्द्रस्निग्धैर्ध्वनिभिः, माधुर्यरमणीयैः शब्दैर्विदग्धदूतप्ररोचनावचनप्रायैरित्यर्थः । क्व—पथि मार्गे । यदृच्छया यथाकथंचिदहमेतदाचरामीति किं पुनः प्रयत्नेन सुहृत्प्रेमनिमित्तं संरब्धबुद्धिर्न करोमीति ।**

**सुधा**—अत्रेति । अत्र = अस्मिन् श्लोके । प्रथमम् = प्राक् । आमन्त्रणपदार्थः = सम्बोधनपदार्थः । तदाश्वासकारिपरिस्पन्दनिबन्धनः—तस्याः = यक्षिण्याः आश्वासनकारी = आश्वासनदाता परिस्पन्दनिबन्धनः = व्यापारकारणः । भर्त्तुः = स्वामिनः । मित्रम् = सखा । माम् = मा । विद्धि = जानीहि इति आत्मनः = स्वस्य । उपादेयत्वम् = उपयोगिताम् । प्रथयति = प्रमाणयति । तच्च न सामान्यम् = साधारणम् । 'प्रियम्' इति विश्रम्भकथापात्रताम् = विश्वासवार्त्तापात्रताम् । इति = एवम् । ताम् = यक्षिणीम् आश्वास्य = धैर्यं दत्वा । उन्मुखीकृत्य = ध्यानमाकृष्य च । तत्सन्देशात् = तत्समाचारात् । त्वत्समीपम् = तव पार्श्वम् । आगमनम् इति प्रकृतम् = मौलिकम् । प्रस्तौति = उपस्थापयति । हृदयनिहितात् = चेतसि धृतात् । इति स्वहृदयनिहितम् = आत्मचेतोधृतम् । सावधानत्वम् = सावधानताम् । द्योतते = प्रकटयति । ननु च अन्यः = अपरः कश्चित् । एवं विधव्यवहारविदग्धबुद्धिः = एतत्प्रकारकव्यवहारकुशलधीः कथं न नियुक्तः = कथं न स्थापितः । इति आह = प्राह । मम = मे एव अत्र किमपि = किञ्चिदपि कौशलम् = निपुणत्वम् । विजृम्भते = दृश्यते । 'अम्बुवाहम्' इति । आमनः = मनः पर्यन्तम् । तत्कारिताभिधानम् = अम्बुवहनकार्यनामकम् । द्योतयति = प्रकटयति । यः प्रोषितानाम् = विदेशगतानाम् । वृन्दानि = समूहानि । त्वरयति = द्रुतयति । कीदृशानाम् = कीदृग्विधानाम् । श्राम्यताम् = विश्राम्यताम् । त्वरायाम् = शीघ्रतायाम् । असमर्थानाम् = अशक्तानाम् अपि । 'वृन्दानि' इति बाहुल्यात् = बहुवचनात् । तत्कारिताभ्यासम् = तत्कृत्याभ्यासम् । कथयति = वदति । केन = केन प्रकारेण ? मन्द्रस्निग्धैः—मन्द्रैः = गभीरैः स्निग्धैश्च । ध्वनिभिः = रवैः । माधुर्यरमणीयशब्दैः । विदग्धदूतप्ररोचनावचनप्रायैः = चतुरदूतवचनरचनाप्रायैः । इति अर्थः = अभिप्रायः । क्व = कुत्र ? पथि = वर्त्मनि । यदृच्छया = यथेच्छया । यथा कथञ्चित् = येन केन प्रकारेण । अहम् एतत् = इदम् । आचरामि = करोमि इति । किं पुनः प्रयत्नेन = प्रयासेन सुहृत्प्रेमनिमित्तम् = मित्रप्रीतिकारणम् । संरब्धबुद्धिः = समाहितचेता । न करोमि = नैव सम्पादयामि इति ।

**हिन्दी**—इस श्लोक में प्रथम सम्बोधन पदार्थ उसे ( यक्षिणी को ) धैर्य बंधाने का कारण है । "मुझे अपने पति का मित्र समझ लो" । यह कथन अपनी उपादेयता सिद्ध करता है । वह मित्र भी साधारण नहीं है 'प्रियमित्र' है । इससे अपनी विश्रम्भकथा

Scanned with CamScanner

( विश्वास पूर्ण वार्तालाप ) की पात्रता भी है। इस प्रकार उस यक्षिणी को आश्वासन देकर, उसका ध्यान अपनी ओर आकृष्ट कर यक्ष के सन्देश से उसके पास आगमन हुआ है। यह स्वाभाविक रूप को प्रस्तुत करता है। 'हृदयनिहित' शब्द से अपने हृदय में स्थित सावधानता को द्योतित करता है। यदि अन्य कोई इस प्रकार व्यवहारकुशल बुद्धि व्यक्ति यक्ष को सन्देश भेजने को क्यों नहीं नियुक्त किया गया ? इसका उत्तर है कि मेरा ही इस विषय में कोई कौशल दिखलायी पड़ता है तथा 'अम्बुवाहम्' ( जल को वहन करने वाले मुझ मेघ को ) इससे अपने उस सन्देश वहन करने के कार्य को करने की संज्ञा को द्योतित करता है जो परदेशियों के समूहों को शीघ्र जाने के लिए विवश करते हैं। कैसे परदेशियों को ? विश्राम करते हुए अर्थात् थकावट से शीघ्रता करने में असमर्थों को भी। 'वृन्दानि' पद से बहुलता की सूचना से उस कार्य को करने के अभ्यास को बतलाता है। किस प्रकार ? धीमी स्निग्ध ध्वनियों से अर्थात् रमणीय शब्दों से तथा चतुर दूत की प्ररोचना युक्त बातों से कहां ? मार्ग में। स्वेच्छया जैसे तैसे मैं यह आचरण करता हूँ तो फिर प्रयत्न करके अपने मित्र के प्रेम निमित्त सावधान होकर क्यों न करूँ, ऐसा अर्थ द्योतित होता है।

**कीदृशानि वृन्दानि—अबलावेणिमोक्षोत्सुकानि। 'अबला' शब्देनात्र तत्प्रेयसी-विरहवैधुर्यासहत्वं भण्यते, तद्वेणिमोक्षोत्सुकानीति तेषां तदनुरक्तचित्तवृत्तित्वम्। तदयमत्र वाक्यार्थः—विधिविहितविरहवैधुर्यस्य परस्परानुरक्तचित्तवृत्तेर्यस्य कस्य-चित्कामिजनस्य समागमसौख्यसम्पादनसौहार्दे सदैव गृहीतव्रतोऽस्मीति। अत्र यः पदार्थपरिस्पन्दः कविनोपनिबद्धः प्रबन्धस्य मेघदूतत्वे परमार्थतः स एव जीवित-मिति सुतरां सहृदयहृदयाह्लादकारी। न पुनरेवंविधो यथा—**

**सुधा—**कीदृशानीति। कीदृशानि वृन्दानि = कीदृक्समूहानि। अबलावेणिमोक्षो-त्सुकानि—अबलानाम् = नारीणाम् वेणिमोक्षाय = कचविमोचनायोत्सुकानि = इच्छु-कानि। 'अबला' शब्देनात्र तत्प्रेयसी विरहवैधुर्यासहत्वम्—तस्य = यक्षस्य प्रेयस्याः = प्रियायाः वैधुर्यासहत्वम् = विरहासहिष्णुता। भण्यते = कथ्यते। तद्वेणिमोक्षोत्सुकानि इति तेषां प्रोषितानाम् = विदेशिनाम्। तदनुरक्तचित्तवृत्तित्वम् = यक्षिण्यनुरक्तमनो-वृत्तिताम्। तत् = तस्मात्। अयम् = एषः। अत्र = श्लोके। वाक्यार्थः = वाक्याशयः अस्ति। विधिविहितविरहवैधुर्यस्य = दैवकृतवियोगविधुरतायाः। परस्परानुरक्तचित्त-वृत्तेः = अन्योन्यानुरक्तमनोदशायुक्तस्य। यस्य कस्यचित् = यस्य कस्यापि। कामिजनस्य = कामुकस्य। समागमसौख्यसम्पादनसौहार्द्रे = मिलनानन्दसम्पादनप्रिये मयि। सदैव = नित्यम्। गृहीतव्रतः = कृतसंकल्पः अस्मीति। अत्र = एतस्मिन् स्थाने। यः पदार्थपरि-स्पन्दः = मेघस्वभावः। कविना = सूरिणा। उपनिबद्धः = लिखितः। प्रबन्धस्य = काव्यस्य मेघदूतत्वे परमार्थतः = वस्तुतः। स एव = असावेव। जीवितम् = प्राणभूतम् इति। सुतराम् = नितराम्। सहृदयहृदयाह्लादकारी = सत्पुरुषानन्ददायी। न पुनः एवं विधः ईदृशः। यथा—



**हिन्दी—**कैसे समूह ? अबलाओं के केशपाश को खोलने के लिए उत्सुक। यहां पर अबला शब्द से परदेशी पतियों की प्रियतमाओं के विरह की असह्य व्याकुलता कही जा रही है। 'उनकी चोटियों को खोलने के लिए' पद से परदेशी पतियों की अपनी प्रियतमाओं में अनुरक्त होने की मनोदशा बतलायी गयी है अतः इस वाक्य का यहां पर यह अर्थ है कि भाग्यजनित विरह विकल परस्पर में अनुरक्त चित्त वृत्ति वाले जिस किसी का भी पुरुष के समागम सुख के सम्पादन रूप सौहार्द में मैं सदैव कृतसङ्कल्प हूं। यहां पर जो पदार्थ ( मेघ ) का स्वभाव कवि ने वर्णित किया है प्रबन्ध के मेघदूतत्व में वास्तव में यही प्राण भूत बन गया है अतः वह सहृदय जनों के हृदय को आह्लादकारी है न कि फिर इस प्रकार। यथा—

> **सद्यः पुरीपरिसरेऽपि शिरीषमृद्वी**
> **सीता जवात् त्रिचतुराणि पदानि गत्वा।**
> **गन्तव्यमद्य कियदित्यसकृद् ब्रुवाणा**
> **रामाश्रुणः कृतवती प्रथमावतारम्॥ ३३॥**

**अन्वयः—**शिरीषमृद्वी सीता सद्यः पुरीपरिसरे अपि जवात् त्रिचतुराणि पदानि गत्वा अद्य कियत् गन्तव्यम् इति असकृत् ब्रुवाणा रामाश्रुणः प्रथमावतारं कृतवती।

**सुधा—**सद्य इति। शिरीषमृद्वी = शिरीषकुसुमसदृशकोमलाङ्गी। सीता = जनक-नन्दिनी। सद्यः = तत्क्षणम्। पुरीपरिसरे—पुर्याः = अयोध्यायाः परिसरे = समीपे अपि। जवात् = शीघ्रतया। त्रिचतुराणि = कतिपयानि। पदानि गत्वा = यात्वा। अद्य = सम्प्रति। कियत् = कियत्प्रमाणम्। गन्तव्यम् = चलितव्यम् इति। असकृत् = बारंबारम्। ब्रुवाणा = भाषमाणा। रामाश्रुणः—रामस्य = रामचन्द्रस्याश्रुणः = नयनवारिणः। प्रथमा-वतारम्—प्रथमम् = प्रथमवारम् अवतारम् = अवतरितम्। कृतवती = विहितवती।

**हिन्दी—**शिरीष कुसुम सदृश कोमल अङ्गों वाली जनकनन्दिनी सीता ने तत्काल अयोध्या पुरी के समीप ही शीघ्रता से तीन चार कदम चलकर ( थक जाने के कारण ) "अभी कितनी दूर और चलना है"। ऐसा बार-बार कहते हुए रामचन्द्र के आंसुओं को प्रथम बार अवतरित किया अर्थात् राम की आंखों में आंसू छलक आये॥ ३३॥

**अत्रासकृत्प्रतिक्षणं कियदद्य गन्तव्यमित्यभिधानलक्षणः परिस्पन्दो न स्वभाव-महत्तामुन्मीलयति, न च रसपरिपोषाङ्गतां प्रतिपद्यते। यस्मात्सीतायाः सहजेन केनाप्यौचित्येन गन्तुमध्यवसितायाः सौकुमार्यादेवंविधं वस्तु हृदये परिस्फुरदपि वचनमारोहतीति सहृदयैः सम्भावयितुं न पार्यते। न च प्रतिक्षणमभिधीयमानमपि राघवाश्रुप्रथमावतारस्य सम्यक् सङ्गतिं भजते, सकृदाकर्णनादेव तस्योपपत्तेः। एतच्चात्यन्तरमणीयमपि मनाङ्मात्रस्खलितावधानत्वेन कवेः कदर्थितम्। तस्माद् 'अवशम्' इत्यत्र पाठः कर्तव्यः। तदेवंविधं विशिष्टमेव शब्दार्थयोर्लक्षणमुपादेयम्। तेन नेयार्थापार्थादयो दूरोत्सारितत्वात्पृथङ् न वक्तव्याः।**

**सुधा—**अत्रेति। अत्र = अस्मिन् उदाहरणे। असकृत् = बारंबारम् प्रतिक्षणं च।



Scanned with CamScanner

कियत् = कियत्प्रमाणम् । अद्य = सम्प्रति । गन्तव्यम् = यातव्यम् । गमनीयमवशिष्टम् । इति अभिधानलक्षण: = कथनरूप: । परिस्पन्द: = व्यापार: । स्वभावमहत्ताम् = प्रकृति-महत्त्वम् । नोन्मूलयति = नैव प्रकटयति । च = तथा । रसपरिपोषाङ्गताम्—रसस्य = करुणरसस्य । परिपोषणस्य = परिपुष्टे: । अङ्गताम् = अङ्गत्वम् । न प्रतिपद्यते = नैव सम्पद्यते । यस्मात् = यत: । सीताया: = जनकनन्दिन्या: । सहजेन = सरलेन । केनापि औचित्येन = औचित्यकारणेन । गन्तुम् = यातुम् । अध्यवसितताया: = उद्यताया: । सौकुमार्यात् = सुकुमारावस्थाया: । एवं विधम् = ईदृक् । वस्तु = पदार्थ: । हृदये = चेतसि । परिस्फुरत् = स्पन्दितमपि । वचनम् = कथनम् । आरोहति इति = एवम् । सहृदयै: = सज्जनै: । सम्भावयितुम् = कल्पयितुम् । न पारयति = पारं नैव गच्छति । तथा च प्रतिक्षणम् = प्रतिपलम् । अभिधीयमानम् = भाषमाणम् अपि । राघवाश्रुप्रथमावतारस्य = रामनयनवारिण: प्रथमपातस्य । सम्यक् = समीचीनम् । सङ्गति न भजते = संगति न करोति । सकृत् = एकवारम् । आकर्णनात् = आश्रवणात् एव । तस्य=अश्रुण: । उपपत्ते: = प्रमाणात् । तथा च । एतत् = इदम् । अत्यन्तरमणीयम् = अतिमनोरमम् अपि । मनाङ्मात्रं = किञ्चिन्मात्रम् । चलितावधानत्वेन = चलनसावधानतया । कवे: = सूरे: । कदर्थितम् = निन्दितम् । तस्मात् = तत: । अवशम् इत्यत्र पाठ:, कर्त्तव्य: = करणीय: । तत् = तस्य । एवं विधम् = ईदृशम् । विशिष्टम् एव = विशेषमेव । शब्दार्थयो: = वाच्य-वाचकयो: । लक्षणम् = स्वरूपम् । उपादेयम् = उयुक्तम् । तेन=तत: । नेयार्थापार्थादय: = नेयार्थका: । अपार्थादय: = दोषाश्च । दूरोत्सारितत्वात् = दूरत: उत्सारणतया । पृथङ् न वक्तव्या: = पृथङ् न वर्णनीया: ।

**हिन्दी**—यहाँ बार-बार ( प्रतिक्षण ) "अभी और कितना चलना है" यह कथन-रूप व्यापार स्वभाव महत्ता को प्रकट नहीं करता है और न ही रस परिपोषाङ्गता को ही प्रतिपादित करता है क्योंकि किसी सहज औचित्य से जाने को उद्यत सीता के सौकुमार्य से इस प्रकार वस्तु हृदय में परिस्फुटित होते हुए भी कही जा सकती है ऐसा सहृदयजनों द्वारा अनुमान भी नहीं किया जा सकता है तथा प्रतिक्षण कहे जाने पर भी रामाश्रु के प्रथम बार अवतरण ( प्रवाहित ) होने की बात की ठीक संगति नहीं बनती है । क्योंकि एक बार सुनने से ही उसकी उपपत्ति हो जाती है । और फिर यह अत्यन्त रमणीय होते हुए भी यह श्लोक किञ्चिन्मात्र चलने की असावधानी से कवि की निन्दा कर देता है । अत: यहाँ पर 'अवशम्' पाठ कर लेना चाहिए । इस प्रकार विशिष्ट ही शब्द तथा अर्थ का लक्षण उपादेय है । इस कारण से नेयार्थ तथा अपार्थ दोषादि दूर से ही हटा देने के कारण पृथक् नहीं कहे जाने चाहिए ।

**एवं शब्दार्थयो: प्रसिद्धस्वरूपातिरिक्तमन्यदेव रूपान्तरमभिधाय न तावन्मात्रमेव काव्योपयोगि, किन्तु वैचित्र्यान्तरविशिष्टमित्याह—**

**सुधा**—एवमिति । एवम् = इत्थम् । शब्दार्थयो: = वाच्यवाचकयो: । प्रसिद्धस्वरूपातिरिक्तम् = प्रख्यातलक्षणभिन्नम् । अन्यत् = अपरम् एव । रूपान्तरम् = स्वरूपभिन्नम् । अभिधाय = कथयित्वा । तावन्मात्रमेव, न काव्योपयोगि = नैव प्रबन्धोपादेयि । किन्तु = किञ्च । वैचित्र्यान्तरविशिष्टम् = अन्यवैचित्र्यविशेषत्वम् । काव्यलक्षणम् = काव्य स्वरूपम् । इति=एवम् । आह—



**हिन्दी**—इस प्रकार शब्द तथा अर्थ के प्रसिद्ध लक्षण से भिन्न और ही दूसरा लक्षण कह कर तब तक केवल उतना ही काव्य के लिए उपयोगी नहीं है किन्तु भिन्न वैचित्र्य विशेष शब्दार्थ स्वरूप काव्य के लिए उपयोगी नहीं है । अत: यह कहते हैं—

उभावेतावलङ्कार्यौ तयो: पुनरलङ्कृति: ।
वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरुच्यते ॥ १० ॥

**अन्वय:**—एतौ उभौ अलङ्कार्यौ पुन: तयो: अलङ्कृति: वक्रोक्ति: एव वैदग्ध्य-भङ्गीभणिति: उच्यते ।

**सुधा**—उभाविति । एतौ = इमौ । उभौ = द्वौ । अलङ्कार्यौ स्त: । पुन: = भूय: । तयो: = द्वयो: शब्दार्थयो: । अलङ्कृति: = अलङ्कारता । वैदग्ध्यभङ्गीभणिति: = चातुर्य-पूर्णभङ्गी उक्ति: । वक्रोक्ति: = वक्रोक्तिर्नाम । इति = एवम् । उच्यते = कथ्यते ।

**हिन्दी**—यह शब्द तथा अर्थ दोनों ही अलङ्कार्य हैं फिर शब्द तथा अर्थ दोनों की अलङ्कृति चातुर्यपूर्ण कथन वक्रोक्ति कहलाती है ॥ १० ॥

**उभौ द्वावप्येतौ शब्दार्थावलङ्करणीयौ केनापि शोभातिशयकारिणाऽलङ्करणेन योजनीयौ । किं तत्तयोरलङ्करणमित्यभिधीयते—तयो: पुनरलङ्कृति: । तयोर्द्वित्वसंख्याविशिष्टयोरप्यलङ्कृति: पुनरेकैव, यया द्वावप्यलङ्क्रियेते । कासौ—वक्रोक्तिरेव । वक्रोक्ति: प्रसिद्धाभिधानव्यतिरेकिणी विचित्रैवाभिधा । कीदृशी—वैदग्ध्यभङ्गीभणिति: । वैदग्ध्यं विदग्धभाव: कविकर्मकौशलं तस्य भङ्गी विच्छित्ति:, तया भणिति: विचित्रैवाभिधा वक्रोक्तिरित्युच्यते । तदिदमत्र तात्पर्यम्—यत् शब्दार्थौ पृथगवस्थितौ केनापि व्यतिरिक्तेनालङ्करणेन योज्येते, किन्तु वक्रतावैचित्र्ययोगितयाभिधानमेवानयोरलङ्कार:, तस्यैव शोभातिशयकारित्वात् । एतच्च वक्रताव्याख्यानावसर एवोदाहरिष्यते ।**

**सुधा**—उभाविति । उभौ द्वौ अपि एतौ = इमौ । शब्दार्थौ = वाच्यवाचकौ । अलङ्कार्यौ = अलङ्करणीयौ, अलङ्करणयोग्यौ । केनापि शोभातिशयकारिणा = अत्यन्त-सौन्दर्यकारिणा । अलङ्करणेन च = अलङ्कृत्या च । योजनीयौ = संयोज्यौ । किं तत् तयो: = शब्दार्थयो: अलङ्करणम् = अलङ्कृति: । इति अभिधीयते = कथ्यते । पुन: तयो: = शब्दार्थयो: । अलङ्कृति: = अलङ्कार: । तयोर्द्वित्वसंख्याविशिष्टयो: शब्दार्थयो: अपि अलङ्कृति: = अलङ्कार: । पुन: एक एव । यया = अलङ्कृत्या । द्वौ अपि = उभावपि । एतौ = इमौ । अलङ्क्रियेते । असौ का ? वक्रोक्ति: = विचित्रभणति: एवासौ अलङ्कृति: वक्रोक्ति: । प्रसिद्धाभिधानव्यतिरेकिणी = प्रख्यातकथनभिन्ना । विचित्रा = अद्भुतैव । अभिधाऽस्ति । कीदृशी विचित्राभिधा ? वैदग्ध्यभङ्गीभणति: = चातुर्यपूर्णोक्ति: । वैदग्ध्यम् विदग्धभाव:, कविकर्मकौशलं तस्य भङ्गी विच्छित्ति: = शोभा, तया भणति: विचित्रै-

वाभिधा वक्रोक्तिरित्युच्यते । तदिदमत्र तात्पर्यम् = आशयः । यत् शब्दार्थौ = वाच्यवाचकौ । पृथक् अवस्थितौ = स्थितौ केनापि व्यतिरिक्तेन अलङ्करणेन = भिन्नालङ्कारेण । योज्येते = संयोज्येते । किन्तु वक्रतावैचित्र्ययोगितया—वक्रतायाः वैचित्र्ययोगितया = विचित्रता युक्तत्वेन । अभिधानम् एव = कथनमेव । अनयोः = एतयोः अलङ्कारः । तस्यैव शोभातिशयकारित्वात् = अत्यन्तशोभोत्पादनत्वात् । एतत् = इदम् च । वक्रताव्याख्यानावसरे = वक्रतावर्णनकाले एव । उदाहरिष्यते = व्याख्यास्यते ।

**हिन्दी**—यह दोनों शब्द तथा अर्थ अलङ्कार्य एवम् अलङ्करणीय होते हैं किसी शोभाधिक्यकारी अलङ्कार के द्वारा योजनीय होते हैं। उन दोनों का अलङ्करण क्या है ? यह बताया जा रहा है—उन दोनों का अलङ्कार होता है 'तयोः' शब्द द्वित्व संख्याविशिष्ट होने पर भी अलङ्कार केवल एक ही होता है जिसके द्वारा शब्द तथा अर्थ दोनों ही अलंकृत किये जाते हैं। यह वक्रोक्ति क्या है ? प्रसिद्ध कथन से भिन्न विचित्र प्रकार की उक्ति ही वक्रोक्ति है कैसी वक्रोक्ति ? चातुर्य पूर्ण भङ्गिमा द्वारा कथन । वैदग्ध्य विदग्ध ( चतुर ) का भाव अर्थात् कवि कर्म कौशल, उसकी भङ्गी अर्थात् शोभा, जिसके द्वारा विचित्र प्रकार का कथन वक्रोक्ति कहलाती है। इसका तात्पर्य है कि शब्द तथा अर्थ पृथक् स्थित होकर भी किसी भिन्न अलङ्कार से युक्त किये जाते हैं किन्तु वक्रतावैचित्र्ययोगिता से कथन ही इन दोनों शब्द तथा अर्थ का अत्यन्त सुन्दर उत्पादन होने के कारण अलङ्कार होता है। यह वक्रता का वर्णन करते समय ही उद्धृत कर दिया जायेगा।

**ननु च किमिदं प्रसिद्धार्थविरुद्धं प्रतिज्ञायते यद्वक्रोक्तिरेवालङ्कारो नान्यः कश्चिदिति, यतश्चिरन्तनैरपरं स्वभावोक्तिलक्षणमलङ्करणमाम्नातं तच्चातीव रमणीयमित्यसहमानस्तदेव निराकर्तुमाह—**

**सुधा—नन्विति** । प्रसिद्धार्थविरुद्धम् = प्रख्यातार्थविपरीतम् । इदम् = एतत् किं प्रतिज्ञायते = प्रतिज्ञा क्रियते ? यत् = यतः 'वक्रोक्तिः' एवालङ्कारः = अलङ्कृतिः । अन्यः = अपरः कश्चित् अलङ्कारः नास्ति इति । यतः चिरन्तनैः = प्राचीनैः । अपरम् = भिन्नम् । स्वभावोक्तिलक्षणम् = स्वभावोक्तिरूपम् । अलङ्करणम् । आम्नातम् = स्वीकृतम् । तच्च अतीव रमणीयम् = अत्यन्तमनोरमम् । इति असहमानः = सहनं न कुर्वन् । तदेव = स्वभावोक्त्यलङ्कारत्वम् एव निराकर्तुम् = निराकरणार्थम् । आह = प्राह ।

**हिन्दी**—प्रसिद्धार्थ विरुद्ध यह क्या प्रतिज्ञा की जा रही है कि केवल वक्रोक्ति ही अलङ्कार होता है, दूसरा कोई नहीं। क्योंकि प्राचीन ( आलङ्कारिकों ) ने दूसरा स्वभावोक्ति रूप अलङ्कार स्वीकार किया है और वह अत्यन्त रमणीय है ? यह सहन न करते हुए उसी स्वभावोक्ति अलङ्कारत्व का निराकरण करने के लिए कहते हैं—

**अलङ्कारकृतां येषां स्वभावोक्तिरलङ्कृतिः ।**
**अलङ्कार्यतया तेषां किमन्यदवतिष्ठते ॥ ११ ॥**



**अन्वयः**—येषाम् अलङ्कारकृतां स्वभावोक्तिः अलङ्कृतिः, तेषाम् अलङ्कार्यतया अन्यत् किम् अवतिष्ठते ।

**सुधा—अलङ्कारेति** । येषामलङ्कारकृताम् = अलङ्कारग्रन्थकृताम् । स्वभावोक्तिः = स्वभावोक्तिर्नाम । अलङ्कृतिः = अलङ्कारः । तेषाम् = अलङ्कारकृताम् । अलङ्कार्यतया = अलङ्कार्यरूपेण । अन्यत् = अपरम् । किं = किं वस्तु । अवतिष्ठते = अवस्थितं भवति ।

**हिन्दी**—जिन आलङ्कारिकग्रन्थरचयिताओं के लिए स्वभावोक्ति अलङ्कार ही अभिप्रेत है उनके लिए अलङ्कार्य रूप से फिर और क्या रह जाता है ॥ ११ ॥

**येषामलङ्कारकृतामलङ्कारकाराणां स्वभावोक्तिरलङ्कृतिः, या स्वभावस्य पदार्थधर्मलक्षणस्य परिस्पन्दस्य उक्तिरभिधा सैवालङ्कृतिरलङ्करणमिति प्रतिभाति, ते सुकुमारमानसत्वाद् विवेकक्लेशद्वेषिणः। यस्मात् स्वभावोक्तिरिति कोऽर्थः ? स्वभाव एवोच्यमानः स एव यद्यलङ्कारस्तत्किमन्यत्तद्-व्यतिरिक्तं काव्यशरीरकल्पं वस्तु विद्यते यत्तेषामलङ्कार्यतया विभूष्यत्वेनावतिष्ठते पृथगवस्थितिमासादयति, न किञ्चिदित्यर्थः।**

**सुधा—येषामिति** । येषामलङ्कारकृताम् = अलङ्कारग्रन्थलेखकानाम्, दण्डी प्रभृतीनाम् । स्वभावोक्तिः = तन्नामैव । अलङ्कृतिः = अलङ्कारः । या स्वभावस्य = पदार्थधर्मलक्षणस्य । परिस्पन्दस्य = व्यापारस्य स्वभावोक्तिः अभिधा । सैव = अभिधैव । अलङ्कृतिः । इति प्रतिभाति = प्रतीयते । ते = अलङ्कारिक्यः । सुकुमारमानसत्वात् = कोमलहृदयत्वात् । विवेकक्लेशद्वेषिणः—विवेकस्य = ज्ञानस्य । क्लेशः = कष्टम्, तेन द्विषन्तीति = विरोधिनः । यस्मात् = यतः । स्वभावोक्तिः इति कः अर्थः = किं तात्पर्यम् । स्वभाव एव उच्यमानः स्वभावोक्तिः । स एव = स्वभावोक्तिरेव । यदि अलङ्कार = अलङ्कृतिः । तत् = तर्हि । अपरम् = अन्यत् किं तद्व्यतिरिक्तम् = तद्भिन्नम् । काव्यशरीरकल्पम् = काव्यदेहसदृशम् । वस्तु = पदार्थः । विद्यते = वर्तते । यत् तेषाम् सुकुमारमतीनामलङ्कारकृताम् । अलङ्कार्यतया = अलङ्काररूपेण । विभूषत्वेन = अलङ्करणार्हत्वेन । अवतिष्ठते = तिष्ठति । पृथक् = भिन्नम् । अवस्थितिम् = अवस्थानम् च । आसादयति = प्राप्नोति । न किञ्चित् नैव किमपि । इति अर्थः = आशयः ।

**हिन्दी**—जिन अलङ्कार ग्रन्थ रचिताओं दण्डी आदि के लिए स्वभावोक्ति अलङ्कार है जो स्वभाव की अर्थात् पदार्थ धर्म रूप स्वभाव की उक्ति अथवा कथन है वही अलङ्कृति या अलङ्करण प्रतीत होती है। वे सुकुमार बुद्धि होने के कारण विवेक कष्ट से द्वेष करने वाले हैं क्योंकि स्वभावोक्ति का अर्थ क्या है ? स्वभाव ही स्वभावोक्ति होती है। वही जो अलङ्कार है; उससे पृथक् काव्यशरीर-सदृश कौन-सी वस्तु विद्यमान रहती है तथा भिन्न अवस्थिति को प्राप्त करती है, कोई भी वस्तु ऐसी नहीं है।

**ननु च पूर्वमवस्थापितम्—यद्वाक्यस्यैवाविभागस्य सालङ्कारस्य काव्यत्वमिति ( १।६ ) तत्किमर्थमेतदभिधीयते ? सत्यम्, किन्तु तत्रासत्यभूतोऽप्यपोद्धार-**

Scanned with CamScanner

बुद्धिविहितो विभागः कर्तुं शक्यते वर्णपदन्यायेन वाक्यपदन्यायेन चेत्युक्तमेव। एतदेव प्रकारान्तरेण विकल्पयितुमाह—

**सुधा**—नन्विति। ननु च = यद्यपि। पूर्वम् = प्राक्। अवस्थापितम् = भवता प्रतिपादितम् यद् वाक्यस्य = अलङ्कारालङ्कार्यस्य एव। अविभागस्य = विभागहीनस्य। सालङ्कारस्य = अलङ्कारसहितस्य। काव्यत्वम् = काव्यता। इति। तत् = तर्हि। किमर्थम् = किं निमित्तम्। एतत् = इदम्। अभिधीयते = कथ्यते। सत्यम् = तथ्यम्। किन्तु तत्र असत्यभूतः अपि = मिथ्याभूतोऽपि। अपोद्धारबुद्धिविहितः = अपोद्धारबुद्धिभिः कृतः विभागः = भेदः। कर्तुं शक्यते = विधास्यते। वर्णपदन्यायेन अथवा वाक्यपदन्यायेन च उक्तम् = कथितम्। एव। एतत् = इदम् एव। प्रकारान्तरेण = विभिन्नप्रकारेण। विकल्पयितुम् = स्थापयितुम्। आह = प्राह।

**हिन्दी**—फिर यह जो आपने पहले स्थापित किया कि विभाग रहित अलङ्कारयुक्त वाक्य ही काव्य होता है। ( १।६ ) सो अब आप क्यों कह रहे हैं ? यह सच है पर उसमें असत्य भूत अपोद्धारबुद्धि द्वारा किया गया विभाग वर्ण पद न्याय से अथवा वाक्य पद न्याय से किया जा सकता है जैसा कि मैंने कहा है। यही प्रकारान्तर से स्थापित करने को कहते हैं—

**स्वभावव्यतिरेकेण वक्तुमेव न युज्यते।**
**वस्तु तद्रहितं यस्मान्निरुपाख्यं प्रसज्यते ॥ १२ ॥**

**अन्वयः**—स्वभावव्यतिरेकेण ( वस्तु ) वक्तुम् न युज्यते। यस्मात् तद् रहितं वस्तु निरुपाख्यं प्रयुज्यते।

**सुधा**—स्वभावेति। स्वभावव्यतिरेकेण = स्वभावेन विना। वस्तु वक्तुम् = कथयितुम्। न युज्यते = नैव शक्यते। यस्मात् = यतः। तद् रहितम् = स्वभाववर्जितम् वस्तु। निरुपाख्यम् = अभिधानशून्यम्। प्रसज्यते संजायते।

**हिन्दी**—स्वभाव के बिना वस्तु का वर्णन नहीं किया जा सकता है क्योंकि स्वभाव-रहित वस्तु कहने योग्य नहीं होती है ॥ १२ ॥

**स्वभावव्यतिरेकेण स्वपरिस्पन्दं विना निःस्वभावं वक्तुमभिधातुमेव न युज्यते न शक्यते। वस्तु वाच्यलक्षणम्। कुतः—तद्रहितं तेन स्वभावेन रहितं वर्जितं यस्मान्निरुपाख्यं प्रसज्यते। उपाख्याया निष्क्रान्तं निरुपाख्यम्। उपाख्या शब्दः, तस्यागोचरभूतमभिधानायोग्यमेव सम्पद्यते। यस्मात् स्वभावशब्दस्येदृशी व्युत्पत्तिः—भवतोऽस्मादभिधानप्रत्ययाविति भावः, स्वस्यात्मनो भावः स्वभावः। तेन वर्जितमसत्कल्पं वस्तु शशविषाणप्रायं शब्दज्ञानागोचरतां प्रतिपद्यते। स्वभावयुक्तमेव सर्वथाभिधेयपदवीमवतरतीति शाकटिवाक्यानामपि सालङ्कारता प्राप्नोति, स्वभावोक्तियुक्तत्वेन। एतदेव युक्त्यन्तरेण विकल्पयति—**



**सुधा**—स्वभावेति। स्वभावव्यतिरेकेण = स्वपरिस्पन्दं विना निःस्वभावम्। वक्तुम् = अभिधातुम्। एव न युज्यते = न शक्यते। वस्तु = पदार्थः। वाच्यलक्षणम् = वाच्यरूपम्। कुतः = कस्मात्। तद्रहितं—तेन स्वभावेन रहितं = वर्जितम्। यस्मात् निरुपाख्यम् प्रसज्यते—उपाख्यायाः निष्क्रान्तं निरुपाख्यम्, उपाख्या शब्दः तस्यागोचरभूतमभिधानायोग्यमेव सम्पद्यते। यस्मात् स्वभावशब्दस्येदृशी व्युत्पत्तिः = व्याख्या भवतोऽस्मादभिधानप्रत्ययाविति भावः। स्वस्य = आत्मनो भावः स्वभावः। तेन वर्जितमसत्कल्पं वस्तु शशविषाणप्रायं शब्दज्ञानागोचरतां प्रतिपद्यते। स्वभावयुक्तमेव सर्वथाभिधेयपदवीमवतरतीति शाकटिवाक्यानामपि सालङ्कारता प्राप्नोति, स्वभावोक्तियुक्तत्वेन एतदेव युक्त्यन्तरेण = प्रकारान्तरेण। विकल्पयति = स्थापयति।

**हिन्दी**—स्वभाव अर्थात् अपने धर्म के बिना ( निःस्वभाव ) वस्तु का वर्णन नहीं किया जा सकता है। वस्तु वाच्यरूप होती है। क्यों नहीं वर्णन किया जा सकता है ? स्वभावरहित होने के कारण। स्वभाव से वर्जित होने से वस्तु निरुपाख्य होती है। उपाख्या से निष्क्रान्त निरूपाख्य से कही जाती है अर्थात् उपाख्या शब्द, उसके द्वारा अगोचर—अभिधान करने योग्य नहीं रह जाती है क्योंकि स्वभाव शब्द की व्युत्पत्ति इस प्रकार है—इससे अभिधान और प्रत्यय ( कथन तथा ज्ञान ) होते हैं। अपना भाव ही स्वभाव होता है। स्वभाव से वर्जित असत्कल्पवस्तु खरगोश के सींग जैसी असम्भव होती है या शब्द से अगोचर हो जाती है। स्वभाव युक्त वस्तु ही सर्वथा अभिधेय पदवी के योग्य होती है। अतः शाकटि ( गाड़ी हाँकने वाले ) के वाक्यों की भी अलंकारता प्राप्त हो जाती है क्योंकि वह भी स्वभाव से युक्त होते हैं। यही बात इस रूप से स्थापित करते हैं—

**शरीरं चेदलङ्कारः किमलङ्कुरुतेऽपरम्।**
**आत्मैव नात्मनः स्कन्धं क्वचिदप्यधिरोहति ॥ १३ ॥**

**अन्वयः**—चेत् शरीरम् अलङ्कारः, अपरं किम् अलङ्कुरुते। आत्मा एव आत्मनः स्कन्धं क्वचिद् अपि न अधिरोहति ॥ १३ ॥

**सुधा**—शरीरमिति। चेत् = यदि। शरीरम् = देहम्। अलङ्कारः = अलङ्कृतिः। तर्हि अपरम् = अन्यत् किम् अलङ्कुरुते = अलंकरोति। यतः = हि। आत्मा = स्वयम् एव। आत्मनः = स्वस्य। स्कन्धम् = अंसदेशम्। क्वचित् = क्वापि। नाधिरोहति = आरोहणं न करोति।

**हिन्दी**—यदि शरीर ही ( किसी वस्तु का स्वभाव रूप ) अलङ्कार है तो वह किसी अन्य अलङ्कार्य को अलङ्कृत करता है। अपने आप अपने कन्धे पर कहीं कोई आरोहण करता है अर्थात् कदापि नहीं ॥ १३ ॥

**यस्य कस्यचिद्वर्ण्यमानस्य वस्तुनो वर्णनीयत्वेन स्वभाव एव वर्ण्यशरीरम्। स एव चेदलङ्कारो यदि विभूषणं तत्किमपरं तद्व्यतिरिक्तं विद्यते यदलङ्कुरुते**

Scanned with CamScanner

**विभूषयति। स्वात्मानमेवालङ्करोतीति चेत्तदयुक्तम् अनुपपत्तेः। यस्मादात्मैव नात्मनः स्कन्धं क्वचिदप्यधिरोहति, शरीरमेव शरीरस्य न कुत्रचिदप्यंसमधिरोहतीत्यर्थः, स्वात्मनि क्रियाविरोधात्। अन्यच्चाभ्युपगम्यापि ब्रूमः—**

सुधा—यस्येति। यस्य कस्यचित् = यत्कस्यचित्। वर्ण्यमानस्य = वर्णनीयस्य वस्तुनः = पदार्थस्य। वर्णनीयत्वेन = वर्ण्यमानत्वेन। स्वभाव एव। वर्ण्यशरीरं = वर्ण्यनीयदेहम् भवति। स एव=स्वभाव एव। अलङ्कारश्चेत्। विभूषणम्=भूषणम्। तत् = तर्हि। किम् अपरम् = अन्यत्। व्यतिरिक्तम् = भिन्नं, विद्यते=वर्तते। यत् अलङ्कुरुते = विभूषयति। स्वात्मानम् एव अलङ्करोति इति चेत्। तत् अयुक्तम् = अनुपयुक्तम्। अनुपपत्तेः युक्तिसंगतत्वात्। यस्मात् = यतः। आत्मैव=स्वयमेव। आत्मनः=स्वस्य। स्कन्धे = अंसदेशम्। क्वचित् = कुत्रापि नाधिरोहति। शरीरम् एव शरीरस्य = देहस्य। न कुत्रचित् = न क्वापि। अंसम् = स्कन्धम् नाधिरोहतीत्यर्थः। स्वात्मनि क्रियाविरोधात्। अन्यच्च। अभ्युपगम्य=विज्ञायापि। ब्रूमः = पृच्छामः।

हिन्दी—जिस किसी वर्णनीय वस्तु के वर्णनीयत्व से स्वभाव ही वर्ण्य शरीर होता है वही यदि अलङ्कार है तो फिर दूसरी वस्तु ( भिन्न ) क्या शेष रहती है जो कि उसे विभूषित करती है। यदि वह अपने को ही विभूषित करती है तो यह कहना ठीक नहीं है—अनुपपत्ति के कारण। क्योंकि अपने आप ही अपने कन्धे पर कहीं सवार नहीं हुआ जाता है। अपने आप में क्रिया के विरोध से। और भी समझा तथा स्वीकार कर हम पूछते हैं—

> **भूषणत्वे स्वभावस्य विहिते भूषणान्तरे।**
> **भेदावबोधः प्रकटस्तयोरप्रकटोऽथवा ॥ १४ ॥**

अन्वयः—स्वभावस्य भूषणत्वे भूषणान्तरे विहिते भेदावबोधः प्रकटयति अथवा तयोः अप्रकटः।

सुधा—भूषणत्व इति। स्वभावस्य = स्वभावोक्तेः। भूषणत्वे = अलङ्कारत्वे। भूषणान्तरे = उपमाद्यन्यालङ्कारत्वे। विहिते = कृते। भेदावबोधः = विभेदज्ञानम्। प्रकटः = स्पष्टः। अथवा = वा अप्रकटः = अस्पष्टः स्यात्।

हिन्दी—स्वभावोक्ति को अलङ्कार मान लेने पर काव्य में दूसरे अलङ्कारों की रचना पर भेद ज्ञान स्पष्ट रहेगा अथवा अस्पष्ट ॥ १४ ॥

> **स्पष्टे सर्वत्र संसृष्टिरस्पष्टे सङ्करस्ततः।**
> **अलङ्कारान्तराणां च विषयो नावशिष्यते ॥ १५ ॥**

अन्वयः—स्पष्टे सर्वत्र संसृष्टिः तथा अस्पष्टे संकरः। अलङ्कारान्तराणां विषयः च न अवशिष्यते।

सुधा—स्पष्ट इति। स्पष्टे = स्वभावोक्तौ। अपरालङ्कारे च भेदस्य स्पष्टे सति। सर्वत्र, संसृष्टिः = संसृष्टिनामालङ्कारः। तथा उभयो भेदे अस्पष्टे सति। सङ्करालङ्कारः



च। अलङ्काराणाम् = अन्योपमाद्यलङ्काराणां विषयः। नावशिष्यते = अवशिष्टो न भविष्यति।

हिन्दी—स्वभावोक्ति तथा अन्य अलङ्कार में भेद स्पष्ट होने पर सर्वत्र संसृष्टि अलङ्कार होता है तथा इनमें भेद स्पष्ट न होने पर संकर अलङ्कार रहेगा। अतः अन्य अलङ्कारों का विषय ही अवशिष्ट नहीं रहेगा ॥ १५ ॥

**भूषणत्वे स्वभावस्यालङ्कारत्वे स्वपरिस्पन्दस्य यदा भूषणान्तरमलङ्कारान्तरं विधीयते तदा विहिते कृते, तस्मिन् सति, द्वयी गतिः संभवति। कासौ—तयोः स्वभावोक्त्यलङ्कारयोः भेदावबोधो भिन्नत्वप्रतिभासः प्रकटः सुस्पष्टः कदाचिदप्रकटश्चापरिस्फुटो वेति। तदा स्पष्टे प्रकटे तस्मिन् सर्वत्र सर्वस्मिन् कविवाक्ये संसृष्टिरेवैकालङ्कृतिः प्राप्नोति। अस्पष्टे तस्मिन्नप्रकटे सर्वत्रैवैकः संकरोऽलङ्कारः प्राप्नोति। ततः को दोषः स्यादित्याह—अलङ्कारान्तराणां च विषयो नावशिष्यते। अन्येषामलङ्काराणामुपमादीनां विषयो गोचरो न कश्चिदप्यवशिष्यते, निर्विषयत्वमेवायातीत्यर्थः। ततस्तेषां लक्षणकरणवैयर्थ्यप्रसङ्गः। यदि वा तावेव संसृष्टिसंकरौ तेषां विषयत्वेन कल्प्येते तदपि न किञ्चित्, तैरेवालङ्कारकारैस्तस्यार्थस्यानङ्गीकृतत्वात्। इत्यनेनाकाशचर्वणप्रतिमेनालमलीकनिबन्धनेन। प्रकृतमनुसरामः। सर्वथा यस्य कस्यचित् पदार्थजातस्य कविव्यापारविषयत्वेन वर्णनापदवीमवतरतः स्वभाव एव सहृदयाह्लादकारी काव्यशरीरत्वेन वर्णनीयतां प्रतिपद्यते। स एव च यथायोगं शोभातिशयकारिणा येन केनचिदलङ्कारेण योजयितव्यः। तदिदमुक्तम्—'अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः' ( १।९ ) इति। 'उभावेतालङ्कार्यौ' ( १।१० ) इति च।**

सुधा—भूषणत्व इति। भूषणत्वे = स्वभावस्यालङ्कारत्वे स्वपरिस्पन्दस्य यदाभूषणान्तरम् = अलङ्कारान्तरम् विधीयते तदा विहिते=कृते, तस्मिन् सति द्वयी गतिः सम्भवति = भवति। कासौ तयोः = स्वभावोक्त्यलङ्कारान्तरयोः भेदावबोधः = भेदज्ञानम् भिन्नत्वप्रतिभासः प्रकटः=सुस्पष्टः। कदाचित् अप्रकटः=अपरिस्फुटश्चापि वा। तदा, स्पष्टे-प्रकटे, तस्मिन् सर्वत्र = सर्वस्मिन् कविवाक्ये संसृष्टिरेवैकालङ्कृतिः प्राप्नोति। अस्पष्टे = तस्मिन् अप्रकटेसर्वत्रैवैकः सङ्करालङ्कारः प्राप्नोति। ततः कः दोषः स्यात् इत्याह—अलङ्कारान्तराणाम् = उपमाद्यन्यालङ्काराणां च विषयो नावशिष्यते। अन्येषाम् अलङ्काराणाम् उपमादीनां विषयो गोचरो न कश्चिद् अवशिष्यते = निर्विषयत्वमेवायाति इत्यर्थः। ततः तेषां लक्षणकरणवैयर्थ्यप्रसङ्गः। यदि वा तावेव संसृष्टिसंकरौ तेषां विषयत्वेन कल्प्येते, तदपि न कश्चिद्, तैरेवालङ्कारैस्तस्यार्थस्यानङ्गीकृतत्वात्। इति अनेनाकाशचर्वणप्रतिमेनालमलीकनिबन्धनेन। प्रकृतम् = मूलमनुसरामः = अनुसरणं कुर्मः। सर्वथा यस्य कस्यचित् पदार्थजातस्य कविव्यापारविषयत्वेन वर्णनापदवीमवतरतः स्वभाव एव सहृदय हृदयाह्लादकारी = सज्जनचित्तानन्ददायी। काव्यशरीरत्वेन वर्णनीयतां = वर्णनत्वम्। प्रतिपद्यते = प्राप्यते। स एव च यथायोगं शोभातिशयकारिणा = अत्यन्तशोभा

कारिणा। येन केन चित् अलङ्कारेण योजयितव्यः = संयोज्यः। ततः = तस्मात्। इदम् = एतत्। उक्तम् = कथितम् 'अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः' (१।९) इति। 'उभौ = द्वौ। एतौ = इमौ। अलङ्कार्यौ = अलङ्करणयोग्यौ' (१।१०) इति च।

**हिन्दी**—स्वभाव के भूषणत्व होने पर अपने परिस्पन्द (धर्म) का जब अन्य भूषण या अलङ्कार का विधान किया जाता है तब ऐसा करने पर उस दूसरे अलङ्कार के होने पर दो गतियां सम्भव हैं। वह कौन-सी गति अथवा स्थिति है? स्वभावोक्ति तथा अन्य दोनों अलङ्कारों का भेद ज्ञान अर्थात् भिन्नता का प्रतिभास प्रकट के सुस्पष्ट और कभी अप्रकट अथवा अपरिस्फुट होता है तब स्पष्ट अथवा प्रकट होने पर उसमें सभी जगह तथा सम्पूर्ण कविवाक्य में एक संसृष्टि अलङ्कार ही प्राप्त होता है उसके अस्पष्ट या अप्रकट होने पर सर्वत्र एक संकर अलङ्कार प्राप्त होता है तब फिर क्या दोष होगा? इसका उत्तर कह रहे हैं—दूसरे अलङ्कारों का विषय ही शेष नहीं रह जायेगा। उपमादि दूसरे अलङ्कारों का विषय अर्थात् प्राप्ति का स्थान ही कहीं भी नहीं बचेगा अर्थात् निर्विषयत्व को प्राप्त हो जायेंगे। तब इनका लक्षण करना ही व्यर्थ हो जायेगा अथवा यदि वे दोनों संसृष्टि तथा संकर उनके विषयत्व से मान भी लिये जायें तो भी कुछ नहीं क्योंकि उन्हीं अलंकार रचयिताओं द्वारा वह अर्थ अस्वीकार किया गया है। अतः इस आकाशचर्वण के समान व्यर्थ चर्चा से समाप्त किया जाता है। अब मूल ग्रन्थ का अनुसरण कर रहे हैं। सर्व प्रकार से जिस किसी उत्पन्न पदार्थ के कविव्यापार-विषयत्व से वर्णन होते हुए जिस किसी भी पदार्थ का सरसजनों के हृदयों को आह्लादित करने वाला स्वभाव ही काव्य-शरीरत्व से वर्णन को प्राप्त होता है और वही यथा योग अत्यन्तशोभा करने वाले जिस किसी अलंकार के द्वारा जोड़ने योग्य है। अतः यह कहा है—अर्थ सहृदयों को आह्लादित करने वाला स्वस्पन्द सुन्दर (१।९ कारिका) तथा यह दोनों अलङ्कार्य है।" (१।१० कारिका में) प्रतिपादित किया है।

**एवं शब्दार्थयोः परमार्थमभिधाय 'शब्दार्थौ' इति (१।७) काव्यलक्षण-वाक्ये पदमेकं व्याख्यातम्। इदानीं 'सहितौ' इति (१।७) व्याख्यातुं साहित्य-मेतयोः पर्यालोच्यते—**

**सुधा**—एवमिति। एवम् = इत्थम्। शब्दार्थयोः = वाच्यवाचकयोः। परमार्थम् = महत्त्वम्। अभिधाय = उक्त्वा 'शब्दार्थौ' इति (१।७) काव्यलक्षणवाक्ये = काव्यस्य लक्षणरूपे वाक्ये। एकपदम् 'शब्दार्थौ' इति व्याख्यातम् = वर्णितम्। इदानीम् = साम्प्रतम्। 'सहितौ' इति (१।७) व्याख्यातुम् = वर्णयितुम्। एतयोः = शब्दार्थयोः। साहित्यम् पर्यालोच्यते = विमृश्यते।

**हिन्दी**—इस प्रकार शब्द तथा अर्थ के महत्त्व का वर्णन कर 'शब्दार्थौ' इस (१।७) काव्य के लक्षण रूप वाक्य में एक पद की व्याख्या की जा चुकी है। अब 'सहितौ' इस (१।७) कारिका की व्याख्या करने को इन दोनों शब्दों तथा अर्थों के साहित्य की विवेचना की जा रही है—



**शब्दार्थौ सहितावेव प्रतीतौ स्फुरतः सदा।**
**सहिताविति तावेव किमपूर्वं विधीयते ॥ १६ ॥**

**अन्वयः**—शब्दार्थौ सदा सहितौ एव स्फुरतः प्रतीतौ। तौ एव सहितौ इति अपूर्वं किं विधीयते।

**सुधा**—शब्दार्थाविति। शब्दार्थौ = शब्दश्चार्थश्च तौ। सदा = सर्वदा। सहितौ = अवियुक्तौ एव स्फुरतः प्रतीतौ = भासेते। तौ = शब्दार्थौ एव सहितौ = अवियुक्तौ एव साहित्यमिति। अतः अपूर्वम् = अद्भुतम्। किं विधीयते = किं क्रियते।

**हिन्दी**—अवियुक्त शब्द तथा अर्थ ही सदा स्फुरित होकर काव्यरूप में प्रतीत होते हैं। वे दोनों शब्द तथा अर्थ ही अवियुक्त होने पर काव्य होते हैं अतः किस अपूर्व बात का विधान कर रहे हैं ॥ १६ ॥

**शब्दार्थावभिधानाभिधेयौ सहिताववियुक्तावेव सदा सर्वकालं प्रतीतौ स्फुरतः ज्ञाने प्रतिभासेते। ततस्तावेव सहिताववियुक्ताविति किमपूर्वं विधीयते न किञ्चिदपूर्वं निष्पाद्यते, सिद्धं साध्यत इत्यर्थः। तदेवं शब्दार्थयोर्निसर्गसिद्धं साहित्यम्। कः सचेताः पुनस्तदभिधानेन निष्प्रयोजनमात्मानमायासयति? सत्यमेतत्, किन्तु न वाच्यवाचकलक्षणशाश्वतसम्बन्धनिबन्धनं वस्तुतः साहित्य-मित्युच्यते। यस्मादेतस्मिन् साहित्यशब्देनाभिधीयमाने कष्टकल्पनोपरचितानि गाङ्कुटादिवाक्यान्यसम्बद्धानि शाकटिकादिवाक्यानि च सर्वाणि साहित्यशब्दे-नाभिधीयेरन्। तेन पदवाक्यप्रमाणव्यतिरिक्तं किमपि तत्त्वान्तरं साहित्यमिति विभागोऽपि न स्यात्।**

**सुधा**—शब्देति। शब्दार्थौ = अभिधानाभिधेयौ। सहितौ = अवियुक्तौ। एव सदा = सर्वकालम्। प्रतीतौ = ज्ञाने। स्फुरतः = प्रतिभासेते। ततः तौ एव सहितौ = अवियुक्तौ, इति किम् अपूर्वं विधीयते, न किञ्चित् अपूर्वं निष्पाद्यते, सिद्धम् साध्यत इत्यर्थः। तदेवं शब्दार्थयोः। निसर्गसिद्धम् = प्रकृतिसिद्धं साहित्यं कः सचेताः पुनः तदभिधानेन = तत्कथनेन। निष्प्रयोजनम् = व्यर्थम्। आत्मानम् = स्वम्। आयासयति = प्रयासं करोति। एतत् = इदम्। सत्यम् = तथ्यम्। किन्तु न वाच्यवाचकलक्षणशाश्वतसम्बन्धनिबन्धनम् = वाच्यवाचक-रूपनिरन्तरसम्बन्धकारणम्। वस्तुतः = यथार्थतः 'साहित्यम्' इति। उच्यते = कथ्यते। यस्मात् = यतः। एतस्मिन् = अस्मिन्। साहित्यशब्देन अभिधीयमाने = कथ्यमाने। कष्टकल्पनोपरचितानि = कठिनया कल्पनया विरचितानि। गाङ्कुटादिवाक्यानि। असम्बद्धानि = क्रमरहितानि। शाकटिकादिवाक्यानि गड्डलिकावाहकवाक्यानि च। सर्वाणि = अखिलानि। साहित्यशब्देन = साहित्यसंज्ञया अभिधीयेरन् = कथ्येरन्। तेन = तत्कारणेन। पदवाक्यप्रमाणव्यतिरिक्तम्—पदेन = व्याकरणेन, वाक्येन = मीमांसया, प्रमाणेन = न्यायशास्त्रेण, च व्यतिरिक्तम् = भिन्नम्, किमपि। तत्त्वान्तरम् = पृथक् तत्त्वम्। साहित्यम् = साहित्यसंज्ञकम्, इति विभागः = भेदः अपि न स्यात् = न भवेत्।

Scanned with CamScanner

हिन्दी--शब्द तथा अर्थ अर्थात् अभिधान और अभिधेय सदा अवियुक्त ही प्रतीति में स्फुरित होते हुए बुद्धि में प्रतिमासित होते हैं तो फिर वह दोनों ही साथ-साथ अर्थात् अवियुक्त इस प्रकार किस अपूर्व बात को कर रहे हैं या कौन-सी अपूर्व बात नहीं निष्पन्न कर रहे हैं, इसका अर्थ है सिद्ध की ही साधना करना। अतः इस प्रकार शब्द तथा अर्थ में स्वाभाविक रूप से सिद्ध साहित्य होता है तब तो ऐसा कौन सचेतन पुरुष है जो कि साहित्य के कथन से निष्प्रयोजन अपने को कष्ट देना चाहेगा ? यह सच है किन्तु वाच्य-वाचकरूप नित्यसम्बन्ध का निबन्धन ( कारण ) ही वास्तव में साहित्य कहलाता है जिससे इसमें साहित्य शब्द के द्वारा कहे जाने पर कठिन कल्पना द्वारा रचित गाङ्कुटादिवाक्य तथा असम्बद्ध गाड़ी हांकने वाले आदि के वाक्य यह सभी साहित्य नाम से पुकारे जाने चाहिए ? इससे पद ( व्याकरण ) वाक्य ( मीमांसा ) तथा प्रमाण ( न्यायशास्त्र ) से भिन्न कोई अन्य तत्त्व साहित्य है। इस प्रकार का विभाजन सम्भव नहीं होगा।

**ननु च पदादिव्यतिरिक्तं यत्किमपि साहित्यं नाम तदपि सुप्रसिद्धमेव, पुनस्तदभिधानेऽपि कथं न पौनरुक्त्यप्रसङ्गः ? अत एवैतदुच्यते--यदिदं साहित्यं नाम तदेतावति निःसीमनि समयाध्वनि साहित्यशब्दमात्रेणैव प्रसिद्धम्। न पुनरेतस्य कविकर्मकौशलकाष्ठाधिरूढिरमणीयस्याद्यापि कश्चिदयमस्य परमार्थ इति मनाङ्मात्रमपि विचारपदवीमवतीर्णः। तदद्य सरस्वतीहृदयारविन्दमकरन्दबिन्दुसन्दोहसुन्दराणां सत्कविवचसामन्तरामोदमनोहरत्वेन परिस्फुरदेतत् सहृदयषट्चरणगोचरतां नीयते।**

सुधा— नन्विति। ननु च = यदि। पदादिव्यतिरिक्तम् = व्याकरणादिभिन्नम्। यत्किमपि। साहित्यं नाम = साहित्यसंज्ञकम्। तद् अपि, सुप्रसिद्धमेव = विख्यातमेव। पुनः = भूयः। तदभिधानेन—तस्य = साहित्यस्य अभिधानेन = व्याख्यानेन। कथं न पौनरुक्त्यप्रसङ्गः = पुनरुक्तिदोषं, पिष्टपेषणं कथं न स्यात्। अत एव, एवत = वक्ष्यमाणप्रकारकम् उच्यते = कथ्यते। यदिदं, साहित्यं नाम = पूर्वोक्तं, वक्ष्यमाणं वा साहित्याभिधेयम्। तत् = तर्हि। एतावति निःसीमनि = एतावत्यसीमिते। समयाध्वनि = कालवर्त्मनि। साहित्यशब्दमात्रेण = केवलं साहित्यशब्देन, एव प्रसिद्धम् = विख्यातम्। पुनः एतस्य = अस्य। कविकर्म-काष्ठाधिरूढिरमणीयस्य = काव्य-सीमाधिरूढिमनोरमस्य। अद्यापि = सम्प्रत्यपि। कश्चित् = कोऽपि विपश्चित्। यथार्थम्, अयम् = एषः। अस्य = एतस्य। परमार्थः = विशेषार्थः। इति = एवम्। मनाङ्मात्रमपि = स्तोकमात्रमपि। विचारपदवीम् = विवेचनार्थम् अवतीर्णः। तत् = तस्मात्। अद्य = सम्प्रति। सरस्वतीहृदयारविन्द-मकरन्दबिन्दुसन्दोहसुन्दराणाम्—सरस्वत्याः = देव्याः। हृदयम् = चेतःरूपम्, यदरविन्दम् = कमलम्, तस्य मकरन्दबिन्दूनि = पुष्परसकणानि, तेषां सन्दोहेन = समूहेन सुन्दराणाम् = मनोरमाणाम्। सत्कविवचसाम् = सुकविगिराणाम्। अन्तरामोदमनोहरत्वेन = आन्तरिकानन्दमनोरमरूपेण। परिस्फुरत्



एतत् = इदम् साहित्यतत्त्वम्। सहृदयषट्चरणगोचरताम् = सहृदयाः एव षट्चरणाः तेषां गोचरताम् = सज्जनभ्रमरावलोकनताम्। नीयते = प्राप्यते।

हिन्दी--यदि पदादि से भिन्न जो कुछ भी साहित्य होता है तब वह भी सुप्रसिद्ध ही है। फिर उसे कहने पर भी पुनरुक्ति क्यों नहीं होगी ? अत एव कहा जाता है— यदि यही साहित्य है तब तो इतनी बड़ी सीमा ( पराकाष्ठा ) से रहित कालमार्ग में साहित्य शब्द मात्र से ही प्रसिद्ध है फिर उस कवि कर्म ( काव्य ) के कौशल की पराकाष्ठा पर अधिरूढरमणीय साहित्य का आज भी कोई भी यह इसका वास्तविक स्वरूप है। यह किञ्चिन्मात्र भी विवेचन किसी विद्वान् ने नहीं किया है। अतः आज सरस्वती देवी के हृदय-कमल के मकरन्दविन्दुओं के समूह के समान सुन्दर सुकवियों की वाणी का यह आन्तरिक आमोद से मनोरम रूप में परिस्फुरित होता हुआ यह सहृदय रूपी भ्रमरों में दृष्टि पथ में लाया जा रहा है।

साहित्यमनयोः शोभाशालितां प्रति काप्यसौ।
अन्यूनानतिरिक्तत्वमनोहारिण्यवस्थितिः ॥ १७ ॥

अन्वयः--शोभातिशालितां प्रति अनयोः अन्यूना अनतिरिक्तमनोहारिणी असौ कापि अवस्थितिः साहित्यम्।

सुधा—साहित्यमिति। शोभाविशालितां प्रति = अतिशयसौन्दर्यं प्रति। अनयोः = एतयोः। अन्यूना = महती। अनतिरिक्तमनोहारिणी = परस्परस्पर्धया रमणीया। असौ = सा। कापि = अपूर्वा। अवस्थितिः = स्थितिः। साहित्यम् अभिधीयते।

हिन्दी—अत्यन्तसौन्दर्य द्वारा प्रशंसा प्राप्त करने के प्रति इन शब्द तथा अर्थ दोनों की अन्यून ( विपुल ) तथा परस्परस्पर्धा से रमणीय यह अपूर्व स्थिति साहित्य कहलाती है ॥ १७ ॥

**सहितयोर्भावः साहित्यम्। अनयोः शब्दार्थयोर्या काप्यलौकिकी चेतनचमत्कारकारितायाः कारणम् अवस्थितिर्विचित्रैव विन्यासभङ्गी। कीदृशी— अन्यूनानतिरिक्तत्वमनोहारिणी, परस्परस्पर्धित्वरमणीया। यस्यां द्वयोरेकतरस्यापि न्यूनत्वं निकर्षो न विद्यते नाप्यतिरिक्तत्वमुत्कर्षो वास्तीत्यर्थः।**

सुधा— सहितयोरिति। सहितयोः = शब्दार्थयुक्तयोः भावः साहित्यं भवति। अनयोः = एतयोः शब्दार्थयोः। या, कापि = काचित्। अलौकिकी = अद्भुता। चेतनचमत्कारकारितायाः = सहृदयानन्दकारितायाः। कारणम् = हेतुः। अवस्थितिः = स्थितिः विचित्रैव = अद्भुतैव। विन्यासभङ्गी = विन्यासभङ्गिमा। कीदृशीः कीदृग्विधा। अन्यूनानतिरिक्तत्वमनोहारिणी = न्यूनतायाः, आधिक्यस्याभावेन च मनोरमा। परस्परस्पर्धित्वरमणीया = अन्योन्यस्पर्धया मनोरमा। यस्यां द्वयोः = शब्दार्थयोरुभयोः। एकतरस्यापि = एकस्यापि। न्यूनत्वम् = हीनत्वं। निकर्षः = अपकर्षः। न विद्यते = नैव वर्तते। वा = अथवा। अतिरिक्तत्वम् = आधिक्यम्। उत्कर्षः = उत्थानम्। अस्तीत्यर्थः।

Scanned with CamScanner

हिन्दी—शब्द तथा अर्थ दोनों का सहित भाव साहित्य होता है। इन शब्द तथा अर्थ दोनों शब्दों की सचेतनों में चमत्कार करने वाली कोई अलौकिकी विचित्र अवस्थिति विन्यास-भंगिमा है। यह विन्यास-भंगिमा कैसी? जो कि न्यूनता तथा आधिक्य के अभाव से मनोहारिणी और परस्पर स्पर्धा से रमणीय है जिसमें शब्द और अर्थ दोनों में से एक को भी न्यूनता—निकर्ष नहीं है अथवा आधिक्य—उत्कर्ष भी नहीं है ऐसी अवस्थिति ही साहित्य होती है।

**ननु च तथाविधं साम्यं द्वयोरुपहतयोरपि सम्भवतीत्याह—शोभाशालितां प्रति। शोभा सौन्दर्यमुच्यते। तया शालते श्लाघते यः स शोभाशाली, तस्य भावः शोभाशालिता, तां प्रति सौन्दर्यश्लाघितां प्रतीत्यर्थः। सैव च सहृदयाह्लादकारिता। तस्यां स्पर्धित्वेन यासाववस्थितिः परस्परसाम्यसुभगमवस्थानं सा साहित्यमुच्यते। तत्र वाचकस्य वाचकान्तरेण वाच्यस्य वाच्यान्तरेण साहित्यमभिप्रेतम्, वाक्ये काव्यलक्षणस्य परिसमाप्तत्वादिति प्रतिपादितमेव ( १।७ )।**

**सुधा**—ननु चेति। यदि तथाविषम् = तादृक्। साम्यम् = समानता। द्वयोः = उभयोः, शब्दार्थयोः। उपहतयोः = सहितयोः अपि। सम्भवति = साहित्यं भवति। इति आह = इत्यकथयत्। शोभातिशालितां प्रति = अत्यन्तसौन्दर्यप्रशंसा प्रति। शोभा-सौन्दर्यम् उच्यते = कथ्यते। तया = शोभया। शालते = श्लाघ्यते यः सः शोभाशाली, तस्य भावः शोभाशालिता, तां प्रति = सौन्दर्यश्लाघितां प्रति। सैव = सौन्दर्यश्लाघितैव। सहृदयाह्लादकारिता = रसिकजनानन्दकारिता। तस्यां स्पर्धित्वेन = स्पर्धतया। या असौ अवस्थितिः = स्थितिः। परस्पर साम्यसुभगम् = न्यूनाधिक्य रहितेन साम्येन मनोरमम् अवस्थानम् = अवस्थितिः। सा साहित्यम् उच्यते = कथ्यते। तत्र वाचकस्य = शब्दस्य। वाचकान्तरेण = अन्यशब्देन सह। वाच्यस्य = अर्थस्य च। वाच्यान्तरेण = अन्यार्थेन सह साहित्यम् अपि अभीष्टम्। काव्यलक्षणस्य = काव्यस्वरूपस्य। वाक्ये परिसमाप्तत्वात् प्रतिपादितम् एव = समर्थितमेव।

**हिन्दी**—उस प्रकार का न्यूनाधिक्य रहित साम्य तो दोनों निकृष्ट शब्द और अर्थ भी सम्भव है अतः वह भी साहित्य कहा जायेगा? इसका उत्तर देते हैं अत्यन्तसौन्दर्य की प्रशंसा के प्रति साहित्य हो। शोभा सौन्दर्य कहलाता है उससे जिसकी प्रशंसा की जाती है वह शोभाशाली और उसका भाव शोभाशालिता तथा इसके प्रति अर्थात् सौन्दर्य श्लाघिता के प्रति। और वही सौन्दर्य शालिता सहृदयों को आह्लादित करने वाली होती है। उसमें स्पर्धा होने से जो वह स्थिति अर्थात् न्यूनाधिक रहित सुन्दर अवस्थान होता है वही साहित्य कहलाता है। उसमें वाचक ( शब्द ) को अन्य शब्द से तथा वाच्य ( अर्थ ) को अन्य अर्थ से साहित्य अभीष्ट है। काव्य लक्षण के वाक्य में परिसमाप्त होने से प्रतिपादित किया ही जा चुका है ॥ १।७ ॥

**ननु च वाचकस्य वाच्यान्तरेण वाच्यस्य वाचकान्तरेण कथं न साहित्यमिति चेत्तन्न, क्रमव्युत्क्रमे प्रयोजनाभावादसमन्वयाच्च। तस्मादेतयोः शब्दार्थयोर्यथास्वं**



**यस्यां स्वसम्पत्सामग्रीसमुदायः सहृदयाह्लादकारी परस्परस्पर्धया परिस्फुरति, सा काचिदेव विन्याससम्पत् साहित्यव्यपदेशभाग् भवति।**

**सुधा**—नन्विति। वाचकस्य = शब्दस्य। वाच्यान्तरेण = अन्यार्थेन। वाच्यस्य = अर्थस्य च। वाचकान्तरेण = अन्यशब्देन। कथं न साहित्यम् = साहित्यं कथं न भवतीति। चेत् = यदि, तन्न = तथाविधं न स्यात्। क्रमव्युत्क्रमे = क्रमपरिवर्तने। प्रयोजनाभावात् = प्रयोजनस्याभावात् = हीनतया। असमन्वयात् = असंगत्या च। तस्मात् = तत्कारणात्। एतयोः = एनयोः। शब्दार्थयोः = वाचकवाच्ययोः। यथास्वम् = यथानुरूपम्। यस्यां स्वसम्पत्सामग्रीसमुदायः = निजशोभासामग्रीसमूहः। सहृदयाह्लादकारी = सरसजनानन्दकारी। परस्परस्पर्धया = न्यूनाधिक्यरहितसाम्यस्पर्धया। परिस्फुरति = स्फुरति। सा = एषा। काचिदेव = काप्येव। विन्याससम्पत् = वाक्यविन्याससम्पत्तिः। साहित्यव्यपदेशभाक् = साहित्यनामभाक्। भवति।

**हिन्दी**—वाचक ( शब्द ) को वाच्यान्तर से और वाच्य ( अर्थ ) के वाचकान्तर से साहित्य क्यों नहीं होता है? ऐसा कहना ठीक नहीं है क्योंकि क्रम के परिवर्त्तन में प्रयोजन के अभाव से तथा भली प्रकार संगति न होने के कारण। अतः इन दोनों शब्दार्थों का यथानुरूप अपनी शोभा का सामग्री समूह सहृदयजनों को आनन्दित करने वाला परस्परस्पर्धा से परिस्फुरित होता है। वह कोई विन्याससम्पदा ही साहित्य कहलाने वाली होती है।

**मार्गानुगुण्यसुभगो माधुर्यादिगुणोदयः।**
**अलङ्करणविन्यासो वक्रतातिशयान्वितः ॥ ३४ ॥**

**अन्वयः**—मार्गानुगुण्यसुभगः माधुर्यादिगुणोदयः वक्रतातिशयान्वितः अलङ्करणविन्यासः क्रियते।

**सुधा**—मार्गेति। मार्गानुगुण्यसुभगः = मार्गानुरूपरमणीयः। माधुर्यादिगुणोदयः = माधुर्यप्रभृतिगुणैर्युक्तः। वक्रतातिशयान्वितः = अतिशयवक्रता संयुक्तः। अलङ्करणविन्यासः—अलंकारविशिष्टतया विन्यासः = रचना। क्रियते = विधीयते।

**हिन्दी**—सुकुमारादि काव्यमार्गों के अनुरूप रमणीय, माधुर्यादि गुणों से युक्त तथा अतिशयवक्रता से संयुक्त अलंकारों की विशिष्ट रचना साहित्य कहलाती है ॥ ३४ ॥

**वृत्त्यौचित्यमनोहारि रसानां परिपोषणम्।**
**स्पर्धया विद्यते यत्र यथास्वमुभयोरपि ॥ ३५ ॥**

**अन्वयः**—यत्र वृत्त्यौचित्यमनोहारि रसानां परिपोषणम् उभयोः अपि यथास्वं स्पर्धया विद्यते।

**सुधा**—वृत्त्येति। यत्र = यस्मिन् काव्ये। वृत्त्यौचित्यमनोहारि—वृत्तीनाम् = कैशिक्यादीनाम्। औचित्येन = उपयुक्ततया। मनोहारि = मनोरमम्। रसानाम् = शृङ्गारादीनाम्। परिपोषणम् = परिपुष्टिः। उभयोः = द्वयोः, शब्दार्थयोः। अपि। यथास्वं = यथानु-

Scanned with CamScanner

१८) "तत्त्वं सालङ्कारस्य काव्यता" इति कारिकांशस्य आशयः कुन्तकदिशा स्पष्टीक्रियताम्।

उ:- अस्य अयमर्थः — सालङ्कारस्यालङ्करणसहितस्य सकलस्य निरस्तावयवस्य सतः समुदायस्य काव्यता कविकर्मत्वम्। तेनालङ्कृतस्य काव्यत्वमिति स्थितिः, न पुनः काव्यस्य अलंकारयोग इति।

१९) अलङ्कृतिरलङ्कार्यमपोद्धृत्य विवेच्यते।" — इत्यत्र 'अपोद्धृत्य' शब्दस्य कोऽर्थः।

उ:- अपोद्धृत्य अर्थात् "निष्कृष्य, पृथक् पृथक् अवस्थाप्य, यत्र समुदायरूपे तयोरन्तर्भावः तस्माद् विभज्य।

२०) आचार्यकुन्तकः वक्रोक्तेः कतिभेदान् स्वीकरोति, के च ते।

उ:- आचार्यकुन्तकः वक्रोक्तेः षड् भेदान् स्वीकरोति। ते भेदाः यथा — १. वर्णवक्रता, २. पदपूर्वार्द्धवक्रता, ३. प्रत्ययवक्रता, ४. वाक्यवक्रता, ५. प्रकरणवक्रता, ६. प्रबन्धवक्रता चेति।

Scanned with CamScanner

वक्रोक्तिजीवितम् — 402 (kavya) Pg-1

लघुत्तरीयप्रश्नाः :—

1. वक्रोक्तिजीविते कति अध्यायाः भागाः वा सन्ति?

उ- आचार्यकुन्तकविरचिते वक्रोक्तिजीविते चत्वार अध्यायाः उन्मेषाः वा सन्ति।

2. आचार्यकुन्तकः कस्य सम्प्रदायस्य प्रवर्तकः?

उ:— वक्रोक्तेः सम्प्रदायस्य प्रवर्तकः आसीत्।

3. आचार्यकुन्तकः कदा समुत्पन्नः भवति?

उ- दशमशतकस्य अन्तिमभागे एकादशशतकस्य पूर्वार्द्धे कुन्तकः समुत्पन्नः भवति।

4- वक्रोक्तेः मूलभूता कल्पना कस्य?

उ- वक्रोक्तेः मूलभूता कल्पना काव्यालङ्कारस्य आचार्यभामहस्यास्ति।

5- वक्रोक्तिजीवितमिति ग्रन्थः कतिषु भागेषु विभक्तोऽस्ति? के च ते?

उ- ग्रन्थोऽयम् त्रिषु भागेषु विभक्तोऽस्ति। ते च कारिका-वृत्ति-उदाहरणश्चेति।

6. ग्रन्थस्य प्रारम्भे वृत्तौ कुन्तकः कम् देवं स्तौति?

उ— आचार्यकुन्तकः जगत्त्रितयवैचित्र्यचित्रकर्मविधायिनं शक्तिपरिस्पन्दमात्रोपकरणं शिवं नमस्करोति।

Scanned with CamScanner

Pg-२

७) ग्रन्थारम्भे कारिकायां कुन्तकः काम् देवीं स्तौति?

उ- आचार्यकुन्तकः कारिकायां कवीन्द्रवक्त्रेन्दुलास्यमन्दिर-नर्तकीं सूक्तिपरिस्पन्दसुन्दराभिनयोज्ज्वलां देवीं सरस्वतीं स्तौति।

८) वक्रोक्तिजीवितमिति ग्रन्थस्य अभिधानं किम्?

उ- ग्रन्थस्यास्य 'अलङ्कार' इत्यभिधानम्।

९) ग्रन्थस्यास्य प्रयोजनम् किम्?

उ- लोकोत्तरचमत्कारकारिवैचित्र्यसिद्धिरेव ग्रन्थस्यास्य प्रयोजनम्। यद्यपि सन्ति शतशः काव्यालङ्कारास्तथापि न कुत्रचिदप्येवंविधवैचित्र्यसिद्धिः।

१०) ग्रन्थस्यास्य कुन्तकाभिमतमभिधेयम् किम्?

उ- अत्र उपमार्दप्रमेयजातमभिधेयम्।

११) कुन्तकाभिमतं काव्यस्वरूपं प्रदर्शयत?

अलङ्कृतिरलङ्कार्यमपोद्धृत्य विवेच्यते।
तदुपायतया तत्त्वं सालङ्कारस्य काव्यता॥

१२) कुन्तकोक्तदिशा वक्रोक्तिरिति शब्दस्य कोऽर्थः?

कुन्तकमते वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरिति।
"वक्रोक्तिः प्रसिद्धाभिधानव्यतिरेकिणी विचित्रैवाभिधा। कीदृशी- वैदग्ध्यभङ्गीभणितिः।--- विचित्रैवाभिधा वक्रोक्तिरित्युच्यते।"

Scanned with CamScanner

२३) - कुन्तकोक्तदिशा शब्दार्थयोः स्वरूपं प्रतिपादयत।

उ- यद्यपि लोकव्यवहारे वाच्योऽर्थः वाचकःशब्दः प्रसिद्धं तथापि काव्यमार्गे एतयोः परमार्थोऽयम् —

शब्दो विवक्षितार्थैकवाचकोऽन्येषु सत्स्वपि।
अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः॥

२४) कुन्तकाभिमतं वाचकत्वलक्षणम् किम्?

उ- कविविवक्षितविशेषाभिधानक्षमत्वमेव वाचकत्वलक्षणम्।

२५) शब्दार्थयोः कीदृशं साहित्यं काव्यमार्गे कुन्तकस्य अभिप्रेतमस्ति?

उ- काव्यमार्गे शब्दार्थयोः विशिष्टमेव साहित्यम् कुन्तकस्य अभिप्रेतम्। अतः —

समसर्वगुणौ सन्तौ सुहृदाविव सङ्गतौ।
परस्परस्य शोभायै शब्दार्थौ भवतो यथा॥

२७) कुन्तकेन स्वभावोक्तेरलङ्कारत्वं स्वीकृतं न वेति?

उ. कुन्तकमते येषामलङ्कारग्रन्थकृतां स्वभावोक्तिरलङ्कृतिः तेषाम् अलङ्कार्यतया किमन्यद् अवतिष्ठते? अतः तेन उक्तम् —

शरीरं चेदलङ्कारः किमलङ्कुरुतेऽपरम्।
आत्मैव नात्मनः स्कन्धं क्वचिदप्यधिरोहति।

Scanned with CamScanner